73

THE

# HARIDAS SANSKRIT SERIES
# 72

# SĀDṚS'YA S'ĀSTRĀRTHA KALĀ
AND
# LAḤKARMA S'ĀSTĀRTHA KALĀ

By

*Panditarāja S'rī Veṇīmādhava S'ukla*

EDITED WITH THE PRADIPA NOTES, by

**Pandit Sri Rājanārāyana S'ukla.**

CHOW. SANS. SER. Price Rs. 3 BENARES

# सादृश्यशास्त्रार्थकला
तथा
# लᳵकर्मशास्त्रार्थकला ।

घटिकाशतकशतावधानसंस्कृताशुकविप्रसिद्धशास्त्रार्थिवैयाकरणशिरोमण्या-
द्यनेकपदवीककविचक्रवर्त्ति—

**पण्डितराज शुक्लश्रीवेणीमाधवशास्त्रिणा रचिता ।**

**तदात्मजेन शुक्लश्रीराजनारायणशास्त्रिणा नैयायिकेन**
उपयुक्त"प्रदीप"टिप्पणैर्विभूष्य सम्पादिता ।

PUBLISHED BY

JAYA KRISHNA DÂS HARI DÂS GUPTA

*The Chowkhambâ Sanskrit Series Office.*

Benares City.

1938

[ *All Rights Reserved by the Publishers.* ]

CATALOGUED

INDIAN INSTITUTE OF ADVANCED STUDY
Acc. No. 6532
Date 16/11/65
SIMLA
S
808.53
Su47 S

# विज्ञप्तिविशेषः

अये संस्कृतसाहित्यशास्त्रार्थरसिकाः !

अद्यावधि वादकलापटीयसां श्रीमतान्तत्रभवताम्भवतां शुभसेवासु श्रीमत्तातचरणैर्विनिर्मिता अनेके ग्रन्थहीरकाश्शास्त्रार्थकलासम्पन्नाश्शास्त्रार्थ-कलाभिधाना मया समर्पिताः । अद्यैको विचित्र एवायन्निबन्धस्सादृश्य-शास्त्रार्थकलाख्यो यथार्थनामा पुरतः श्रीमतामुपस्थाप्यते ।

अत्र शाब्दिकानां साधुवादन्ध्वनयतान्तर्कशास्त्रसिद्धान्ताधिगतपाट-वानाम्भूयोऽपि मीमांसकानां साहित्यरसास्वादनपराणामालङ्कारिकाणाञ्च मतं सादृश्यवादे विशेषतश्चकास्ति ।

प्राचीनपद्धत्यनुसारिणः "तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वमिति" सादृश्यलक्षणं साध्वसाधु वेति सम्यगालोच्य "तद्धर्मवत्त्वं सादृश्यम्" इत्यादिनव्यलक्षणान्यत्यन्तचमत्कारपूर्णानि भूयसा शास्त्रार्थबद्धकप्रकारेण परिवर्णितानि ।

अपेक्षितान्यपि बहुशःस्थलानि टिप्पण्यै शरीरास्वास्थ्यवशात् काला-ल्पत्याच्च मे मनोदेशमेव भूषयन्ति । यत्किमपि कृतमपि ममैव न सन्तोष-मावहति किमु भवतां वैदुष्यभाजाम् । परं यथाकथञ्चित् स्वीयाल्पमत्या प्रयोगशास्त्रार्थकलादिवदयमपि परिष्कृत्य सम्पाद्य च विनिवेद्यते ।

अथ "लः कर्मणि च भावे" इति सूत्रोपरि विशिष्टश्शास्त्रार्थः "लःकर्म-शास्त्रार्थकला" भिधानस्तातचरणैर्विरचितस्सहैव प्रकाश्यते ।

मादृशामल्पज्ञानान्दोषवशादक्षरसंयोजकदोषाद् वा विराजमानदो-षाणां कृपया करिष्यन्ति क्षमापनमनुग्रहीष्यन्ति च विद्वज्जनसेवकमिम-मित्याशा ।

वै० शु० ८ सं० १९९५ वै०
ग० सं० कालेज
काशी

भवदीयस्य—
**श्रीराजनारायणशुक्लस्य**
[ नैयायिकस्य ]

Library
S 808.53 Su 47 S
00006532

श्रीगणेशाय नमः ।

# सादृश्यशास्त्रार्थकला ।

अथ मङ्गलाचरणम् ।

नत्वा च(१) विष्णुम्भगवन्तमाद्यं रामानुजंराममतिप्रवीरम् ।
श्रीवैष्णवौ सत्पितरौ गुरुञ्च समारभे कार्यमिदं हिताय ॥ १ ॥
सादृश्यभावे जटिला निबन्धा यद्यप्यनेके विलसन्ति लोके ।
शास्त्रार्थयुद्धे विजयप्रदाञ्च सादृश्यशास्त्रार्थकलान्तनोमि ॥ २ ॥
काशीप्रयागावधमध्यजन्मा कृतश्रमश्शास्त्रनिकुञ्जपुञ्जे ।
ग्रन्थञ्चसत्क्रोडपथानुकूलं सताम्प्रतुष्ट्यै ह्यसतां प्रखित्यै ॥ ३ ॥
सरयुपारीणशुक्लो वेणीमाधवनामकः ।
मामखोर ग्रामजातो गर्गवंशसुधीसुधः ॥ ४ ॥
गोमतीदक्षिणे भागे सती ( सई ) नद्यास्तथोत्तरे ।
यमदग्नि ( जौनपुर ) पुराख्ये च मण्डलेऽभिजनो मतः ॥ ५ ॥
न्यायव्याकरणप्राज्ञस्तर्काऽतर्कपरायणः ।
विशिष्टानुभवप्रज्ञः कुलाचारपथानुगः ॥ ६ ॥

---

## प्रदीपः

ध्यात्वा वार्णी स्वान्तनिष्ठकर्ममात्रप्रपूरिकाम् ।
टिप्पणीं कर्त्तुमारेभे पितुराज्ञावशंवदः ॥ १ ॥
सादृश्यशास्त्रार्थकलाम् प्रदीपैस्स्फोरयाम्यहम् ।
अधीतदर्शनाणुत्वाद् राजनारायणोऽमतिः ॥ २ ॥

( १ ) निखिलप्रत्यवायप्रशमञ्चिकीर्षुरिशिष्टाचारपरम्परावशात् स्वाभीष्टं शेषावतारम्भगवन्तं लक्ष्मणं श्रीरामानुजाचार्यञ्चैकयोक्त्या परिस्तौति नत्वा चेति ।

चिरन्तनसदाचारो भारतीयोन्नतिप्रभः ।
काश्यां वसँश्च शास्त्रेषु नाना टीकां करोम्यहम् ॥ ७ ॥

## सादृश्यमतिरिक्तः पदार्थो नवेति विशिष्टः प्रश्नः

ननु द्रव्यादिसप्तपदार्थातिरिक्तस्सादृश्यपदार्थ एव न प्रसिद्ध इति कथं प्रश्न इति वाच्यम् ? द्रव्यादिपदार्थवृत्तिसप्तत्वं सादृश्यवृत्ति नवेति प्रश्नकर्तुराशयात् ।

द्रव्यादिसप्तपदार्थभिन्नस्सादृश्यपदार्थो ननु सादृश्यस्य सप्तपदार्थान्तर्भाव इति मीमांसकाः ।

सादृश्यपदार्थस्य द्रव्यादिसप्तपदार्थान्तर्भावो न(१)तु सादृश्यमतिरिक्तः पदार्थ इति नैयायिकाः ।

नन्वेवमपि वैशेषिकादिमीमांसकोभयसाधारणस्य सादृश्यत्वस्यैकस्याभावेन तद्घटितकोट्यप्रसिद्धिरिति वाच्यम् ? सादृश्यपदवाच्यत्वेन निवेशं कृत्वा तस्य चोभयमतेऽपि प्रसिद्ध्यनुष्ठानात् । अतिरिक्तत्वानतिरिक्तत्वविचारस्यैव प्रस्तुतत्वाच्च ।

किञ्च पदार्थत्वं द्रव्यादिसप्तत्वव्याप्यन्न वेति पदार्थत्वपक्षिकाया विप्रतिपत्तेरेवानुष्ठीयमानत्वात् ।

---

( १ ) अत्रानुमानप्रकारः—सादृश्य षड्भावानन्तर्भूतं सामान्य ( जाति ) वृत्तित्वे सति सामान्येतर ( व्यक्ति ) वृत्तित्वात् । एवम् सादृश्यं नाभावान्तर्भूतं सत्त्वेन प्रतीयमानत्वात् । अयम्भावः, यथा चैत्रस्तथा मैत्र इत्यादौ तीक्ष्णबुद्धित्वादिना व्यक्तौ सादृश्यम्प्रतीयते, यथा गोत्वन्नित्यन्तथाऽश्वत्वमपीति नित्यत्वेन जात्योस्सादृश्यानुभवः । परमेतत् सर्वमपि पूर्वपक्ष एव ।

वस्तुतस्तु तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वं तत्सादृश्यम् इति धर्मिपदार्थे सादृश्यान्तर्भाव उपाधौ वा । यथा हि चन्द्रवन्मुखमित्यादौ चन्द्रप्रतियोगिकसादृश्याश्रयो मुखमिति बोधः । तत्र हि चन्द्रभिन्नत्वमपि मुखे चन्द्रगता ये भूयांसो धर्मा आह्लादकत्वादयस्तद्वत्त्वमपि मुखे इति । चन्द्रत्वादिस्तु न भूयान्धर्मश्चन्द्रमात्रवृत्तित्वात् फलतश्चन्द्रत्वव्यापकीभूतस्य आह्लादकत्वादेरेव तत्त्वमिति न कश्चिद् दोष इति तार्किकाणां सिद्धान्तः । शाब्दे तु "नञिव युक्तमन्यसदृश" इति वचनेऽन्यपदोपादानेन भेदाघटितं सादृश्यम् ।

नन्वत्र पर्याप्तिसम्बन्धावच्छिन्नप्रतियोगिताकद्रव्यादिसत्वाभाववति प्रत्येकपदार्थे पदार्थत्वसत्त्वात् विधिकोटौ बाधः ।

नच सम्बन्धसामान्यावच्छिन्नप्रतियोगिताकाभाव एवात्र व्याप्यत्वघटक इति वाच्यम् ? सम्बन्धसामान्यावच्छिन्नप्रतियोगिताकद्रव्यादिसप्तत्वाभावाऽप्रसिद्ध्या तथा वक्तुमशक्यत्वात् । इति चेन्न? स्वसमानाधिकरणान्योन्याभावप्रतियोगितानवच्छेदकद्रव्यादिसप्तत्वकत्व तदर्थत्वात् ।

अत्र चावच्छेदकता(१)स्वरूपसम्बन्धावच्छिन्ना बोध्या । तेन पर्याप्तिसम्बन्धेन द्रव्यादिसप्तत्ववद्भेदस्य प्रत्येकं सत्त्वेऽपि न क्षतिः ।

नच सप्तत्वस्य संख्यारूपतया तस्य समवायेनैव वृत्तेस्तत्र निरुक्तस्वरूपसम्बन्धावच्छिन्नावच्छेदकत्वाभावेन विधौ सिद्धसाधनं निषेधकोटौ बाधश्चेति वाच्यम्? सप्तत्वस्यान्यत्र संख्यारूपत्वाऽसम्भवेन अपेक्षाबुद्धिविशेषविषयत्वरूपत्वात् । तस्य च स्वरूपसम्बन्धेन वृत्तित्वान्न काऽपि दोष इति तत्त्वात् ।

अत्र मीमांसकमतम्—सादृश्यन्न द्रव्यादिषड्भावविभाजकोपाधिमत् षड्भावाऽनन्तर्गतत्वात् । नापि अभावविभाजकोपाधिमत् सत्त्वेन प्रतीतिविषयत्वादित्यनुमानाभ्यामर्थाऽपत्त्या वा सादृश्यमतिरिक्तं पदार्थ इति ।

नचैतन्मते प्रथमानुमाने सादृश्यं द्रव्यादिषड्भावविभाजकोपाधिमत् षड्भावान्तर्गतत्वादित्यनेन सत्प्रतिपक्ष इति वाच्यम् ? हेत्वसिद्धेः । तदसिद्धौ किम्प्रमाणमिति चेत् ? सादृश्यन्न षड्भावान्तर्गतं सामान्यवृत्तित्वात् अभाववदित्यनुमानस्यैव प्रमाणत्वात् । तथाहि यथा गोत्वन्निश्यन्तथाऽश्वत्वमपीति प्रतीत्या तस्य सामान्यवृत्तित्वं स्फुटमेव । स्फुटतरञ्च द्रव्यादिसामान्यवृत्तौ घटपटाद्यभावे षड्भावानन्तर्गतत्वमपि ।

नन्वत्र सामान्यत्वे व्यभिचारः सामान्यवृत्तित्ववति तस्मिन् षड्भावान्तर्गतत्वाभावात्तस्यापि सामान्यरूपत्वादिति चेत् ?

अत्र ब्रूमः ।सामान्येतरवृत्तित्वे सति सामान्यवृत्तित्वादित्यस्यैव हेतुत्वात् ।

---

( १ ) इदमत्र बोध्यम् यत् पर्याप्तिसम्बन्धेन द्रव्यादिसप्तता द्रव्यादिसप्तपदार्थेषु नतु प्रत्येकस्मिन् इति तादृशसप्तत्ववद्भेदः प्रत्येकस्मिन् पर्याप्तिसम्बन्धावच्छिन्नः सुलभः । स्वरूपसम्बन्धेन तद्विवक्षणे तु नैष दोषः ।

सामान्यत्वस्य च सामान्येतराऽवृत्तित्वात्। अत एव प्राचीनग्रन्थे सत्यन्तसूचकापिशब्दघटितसामान्येऽपि(१)सत्त्वादिति हेतुरुक्तः।

नचैकस्य गोत्वप्रतियोगिकसादृश्यस्याश्वत्ववृत्तेः सामान्येतरस्मिन्नभावाद्धेत्वसिद्धिरिति वाच्यम्? अधिकरणभेदेन अभावस्येव सादृश्यस्याऽप्यधिकरणभेदेन भेदाभावात् एकस्यैव गोत्वप्रतियोगिकसादृश्यस्य यथा गोत्वं नित्यं तथाश्वत्वमपि आकाशोऽपीति प्रतीतिसिद्धसामान्येतरवृत्तित्वविशिष्टसामान्यवृत्तित्वानपायात् अधिकरणभेदेन सादृश्यभेदेऽपि उपदर्शितप्रतीत्यनुपपत्त्या सादृश्यत्वेनानुगमस्य तस्य सामान्येतरवृत्तित्वविशिष्टसामान्यवृत्तित्वस्योपपादनीयत्वात्।

नन्वेवं सति सामान्येतरवृत्तित्वविशिष्टसामान्यवृत्तित्वस्य हेतुत्वापेक्षया लाघवात् सामान्यसामान्येतरोभयवृत्तित्वस्यैव हेतुत्वमुचितमिति चेन्न? सामान्यसामान्येतरोभयसाधारणस्योभयत्वस्य संख्यारूपत्वाभावेन अननुगतस्यैव निर्वाच्यतया हेत्वननुगमापत्तेः।

अथ भवतामपि सामान्येतरवृत्तित्वयोर्विशेष्यविशेषणभावे विनिगमनाविरहेण हेत्वननुगमस्तुल्य इति चेन्न? स्वेतरनिरूपितत्वसम्बन्धेन सामान्येतरविशिष्टा या सामान्येतरनिरूपिता आधेयता सा वा हेतुरित्यत्र विनिगमनाविरहेणाऽननुगमस्तदवस्थ एवेति चेन्न? स्वेतरनिरूपितत्वसम्बन्धस्योभयत्र तुल्यत्वेऽपि द्वितीयहेतौ सामान्येतरविशिष्टेत्यत्र सामान्येतरनिरूपितेत्यत्र च इतरत्वांशनिवेशाधिक्येन प्रथमहेतौ लाघवस्यैव विनिगमकत्वात्।

नच तथापि स्वनिरूपितत्वसम्बन्धेन सामान्यविशिष्टा या सामान्येतरनिरूपिता आधेयता तामादाय विनिगमनाविरहः, अत्र सम्बन्धांशे इतरत्वांशानिवेशेन लाघवादिति वाच्यम्? सम्बन्धलाघवस्य लाघवत्वेन क्वापि प्रामाणिकैरलिखनेन लाघवत्वाभावात्। तथाच सम्बन्धांशम्विहायैव लाघवगौरवविचारोप-

---

(१) एवं सादृश्यमप्यतिरिक्तः पदार्थः, तद्धि न षट्सु भावेष्वन्तर्भवति सामान्येऽपि सत्त्वात्। नाप्यभावे, सत्त्वेन प्रतीयमानत्वात् इति सिद्धान्तग्रन्थमभिलक्ष्येदम्। अत्रापिना समान्येतरसमुच्चयस्तेन न सामान्यत्वे साध्याभाववति हेतोर्वृत्तित्वमादाय व्यभिचारसम्भवः।

योगितया द्वितीयहेतोरेव गुरुत्वेन प्रथमहेतावेव लाघवेन स एव निर्दुष्टो हेतुरिति न विनिगमनाविरहादिशङ्कावकाश इति तत्त्वम् ।

ननु पड्भावान्तर्गते प्रमेयत्वाभिधेयत्वादौ स्वेतरनिरूपितत्वसम्बन्धेन सामान्यविशिष्टा या सामान्यनिरूपिताऽधेयता तद्वत्त्वेन व्यभिचारः ।

यत्त्वत्र अत्यन्ताभावप्रतियोगित्वरूपव्यतिरेकित्वमपि(१)त्वात्तन्त्रेण विशेषणन्देयमतो न प्रमेयत्वादौ व्यभिचार इति तदसत्? विशेष्यविशेषणभावे विनिगमनाविरहेण हेत्वननुगमापत्तेः। तावतापि द्रव्यसामान्यान्यतरत्वभावत्वादौ व्यभिचारानुद्धाराच्च । तत्रापि व्यतिरेकित्वघटितोपदर्शितहेतुमत्त्वेन पड्भावान्तर्गतत्वेन व्यभिचारस्य जागरूकत्वात् ।

एतेन मीमांसकमते सादृश्यवत् विषयत्वादीनामप्यतिरिक्तपदार्थत्वेन प्रमाविषयत्वरूपप्रमेयत्वादावपि पड्भावानन्तर्गतत्वरूपसाध्यसत्वेन न व्यभिचारः । अत एव दीधितिकारेणाऽपि विषयत्वादीनामतिरिक्तपदार्थत्वमङ्गीकृतमिति समाधानं प्रत्युक्तम् । तावतापि द्रव्यसामान्यान्यतरत्वभावत्वादौ पूर्वोपदर्शितरीत्या व्यभिचारस्य दुरुद्धरत्वात् ।

नच तदपि अतिरिक्तपदार्थ इति आशङ्कनीयम् ? मानाभावात् । तथा सति घटादीनामनन्तत्वेन अनन्तान्यतरत्वकल्पनापत्तेः ।

अनन्तपदार्थाऽभ्युपगमे सर्वत्र विषयव्यवस्थाया विलयापत्तेश्च इति चेन्न ? स्वेतरनिरूपितत्वसम्बन्धेन सामान्यविशिष्टसामान्यनिरूपिताऽधेयतावच्छेदकैकपदार्थविभाजकोपाधिमत्त्वस्य निर्दुष्टहेतुत्वात् । भवति हि यथा अभावत्वरूपपदार्थविभाजकोपाधिः निरुक्तसम्बन्धेन सामान्यविशिष्टसामान्यनिरूपिताधेयतावच्छेदकः, अभावस्य अभावत्वरूपेणोभयत्र वृत्तेः । तथा सादृश्यत्वरूपपदार्थविभाजकोपाधिरपि निरुक्तसम्बन्धेन सामान्यविशिष्टसामान्यनिरूपिताधेयतावच्छेदकः, सादृश्यस्य सादृश्यत्वरूपेणोभयत्र वृत्तेस्तद्वत्त्वस्य सादृश्येऽक्षतत्त्वात् ।

---

( १ ) प्रमेयत्वस्य विषयतारूपस्य प्रतिविषयं भिन्नत्वेन कस्यापि विषयतायां सामान्यतदितरोभयवृत्तित्वासम्भवेन प्रमेयत्वेऽपि व्यभिचारसम्भवात् हेतौ व्यतिरेकित्वविशेषणमनर्थकम् । परन्तु विषयस्वरूपाया विषयतायाः स्वरूपसम्बन्धेन सामान्यवृत्तित्वसत्त्वात् तत्र व्यभिचारवारणाय सामान्यवृत्तित्वे विषयतात्वाद्यवच्छिन्नत्वं विशेषणमपरन्देयमिति केचित् ।

नच सादृश्यस्य अभावस्य च सप्रतियोगिकपदार्थत्वेन किञ्चित्प्रतियोगिकत्वविशिष्टत्वेनैवाधेयतावच्छेदकतया शुद्धसादृश्यत्वाभावत्वयोस्तथात्वेन हेत्वसिद्धिदृष्टान्ताऽसिद्धी इति वाच्यम् ? अवच्छेदकतांशे पर्याप्तेरविवक्षितत्वेन अधिकन्त्विति न्यायेन सादृश्यत्वाभावत्वयोस्तदवच्छेदकत्वेन हेत्वसिद्धिदृष्टान्तासिद्ध्योरभावात्। प्रमेयत्वद्रव्यसामान्यान्यतरत्वत्वभावत्वादौ चोपपदर्शिताधेयतायाः पदार्थविभाजकोपाध्यनवच्छिन्नत्वात् प्रमेयत्वत्वद्रव्यसामान्यान्यतरत्वत्वभावत्वत्वादेः पदार्थविभाजकोपाधित्वाभावात् इति व्यभिचारनिरासः।

यदि च विषयताया अतिरिक्तपदार्थत्वेन प्रमाविषयत्वत्वस्यावच्छेदकत्वेन विषयत्वस्वरूपपदार्थविभाजकोपाधिमत्त्वस्य षड्भावेऽपि सत्त्वेन तत्र व्यभिचारः, तस्यापि पदार्थो द्विविधः भावोऽभावश्चेति पदार्थविभाजकोपाधित्वादत एव एकत्वं पदार्थविशेषणम् भावत्वस्यानेकपदार्थविभाजकोपाधित्वेन तत्रोक्तदोषाभावात्।

नन्वेतदनुमाने पक्षतावच्छेदकं सादृश्यत्वमेव तच्च अनुगतमतिप्रसक्तञ्च दुर्वचमिति चेत् ? भावत्वे सति स्वेतरनिरूपितत्वसम्बन्धेन सामान्यविशिष्टसामान्यनिरूपिताधेयतावच्छेदकैकपदार्थविभाजकोपाधिमत्त्वस्यैव सादृश्यरूपत्वात्। सत्यन्तविशेषणमभावेऽतिप्रसङ्गवारणाय।

नचैवं पक्षतावच्छेदकहेत्वोरैक्यापत्तिरिति वाच्यम् ? पक्षतावच्छेदकतापर्याप्त्यधिकरणहेत्वोरैक्यस्यैव दोषावहत्वे प्रकृते भावत्वघटितोपदर्शितधर्मस्य पक्षतावच्छेदकतापर्याप्त्यधिकरणत्वेन तदघटितस्य च हेतुत्वेन पक्षतावच्छेदकतापर्याप्त्यधिकरणहेत्वोरैक्याभावात्।

मतद्वयसाधारणं सादृश्यत्वञ्च सादृश्यपदवाच्यत्वमेव। अभावत्वादिवत् सादृश्यत्वस्याखण्डोपाधित्वेन तस्यैव पक्षतावच्छेदकत्वे तु नानुपपत्तिलेशोऽपि, तस्य स्वरूपतः पक्षतावच्छेदकत्वेन निरुक्तपदार्थविभाजकोपाधित्वेन हेतुघटकत्वेन तयोरैक्याभावादिति।

यत्तु सादृश्यत्वं जातिरिति तन्न ? सादृश्यस्य जातिवृत्तित्वेन सादृश्यत्वस्य जातित्वासम्भवात्। अनवस्थादोषतौल्येन जातौ जातेरिव जातिवृत्तिधर्मेऽपि जातित्वस्यानङ्गीकारात्। यदपि तन्मते सप्तपदार्थभिन्नत्वमेव सादृश्यत्वमिति तदपि न ? तन्मतसिद्धशक्त्यादिसाधारणत्वात्।

केचित्तु प्रमेयत्त्वादेः स्वरूपसम्बन्धरूपतत्तद्विषयात्मकत्वेन द्रव्यसामान्यान्यतरत्वादेः द्रव्यत्वसामान्यान्यतररूपत्वेन च स्वेतरनिरूपितत्वसम्बन्धेन सामान्यविशिष्टसामान्यनिरूपिताऽधेयत्वाभावेनैव वारणेनोपदर्शितविषयतावच्छेदकपदार्थविभाजकोपाधिमत्वपर्यन्तस्य हेतुत्वविवक्षणन्निष्फलमित्याहुः । तदसत् ? प्रमेयत्त्वं सामान्यसामान्येतरवृत्ति द्रव्यसामान्यान्यतरत्वं द्रव्यसामान्यवृत्तीत्यादिप्रतीत्यनुपपत्त्या तेषामनुगतत्त्वेऽपि प्रमेयत्वत्वद्रव्यसामान्यान्यतरत्वादिना अनुगमस्य तदुभयवृत्तित्वस्योपपादनीयतया स्वेतरनिरूपितत्वसम्बन्धेन सामान्यविशिष्टसामान्यनिरूपिताऽधेयत्वस्य तेषु सत्त्वेन तत्र भावत्वादौ च व्यभिचारवारणार्थं पूर्वोपदर्शितविवक्षाया आवश्यकत्वात् । तस्मादुपदर्शितरीत्या सादृश्यस्य षड्भावानन्तर्गतत्वे सिद्धे सत्प्रतिक्षाऽसम्भवात् । पूर्वोक्तानुमानद्वयेन अर्थापत्त्या वा सादृश्यस्यातिरिक्तपदार्थत्वसिद्धिरिति मीमांसकमतनिगर्वः ।

अत्र वैशेषिकादयः सादृश्यत्वस्य पदार्थविभाजिकोपाधित्वे मानाभावेन तद्घटितहेतुना सादृश्ये षड्भावानन्तर्गतत्वासिद्ध्या सत्प्रतिपक्षस्वरूपासिद्धिसाम्राज्यादुपदर्शितानुमानान्न सादृश्यस्यातिरिक्तत्वसिद्धिः ।

नच यथा गोत्वन्नित्यं तथाश्वत्वमपि आकाशोऽपीति प्रतीत्या नित्यत्वरूपसादृश्यनिष्ठायाः स्वेतरनिरूपितत्वसम्बन्धेन सामान्यविशिष्टसामान्यनिरूपिताधेयताया नित्यत्वत्वावच्छिन्नतया तद्घटकतया अभावस्वरूपपदार्थविभाजकोपाधेरत्र निरुक्ताधेयतावच्छेदकतया तद्घटितहेतुना षड्भावानन्तर्गतत्वं सेत्स्यतीति वाच्यम् ? मुखनिष्ठचन्द्रसादृश्यादावुक्तहेत्वभावेन भागासिद्ध्यापत्तेः ।

नच सामानाधिकरण्येन साध्यसिद्धेरुद्देश्यत्वान्न दोष इति वाच्यम् ? नित्यत्वात्मकाभावरूपसादृश्ये षड्भावानन्तर्गतत्वेन सिद्धसाधनापत्तेरिति । नाप्यर्थापत्त्या सादृश्यस्यातिरिक्तत्वसिद्धिः ? अन्यथानुपपत्त्यभावात् । तथापि सादृश्यस्यातिरिक्तत्वेऽपि तन्न सर्वसाधारणमेकम्, सर्वत्र सर्वसादृश्यस्य स्वस्मिन्नपि स्वसादृश्यस्य च व्यवहारापत्तेः । सुसदृशोऽयम् मन्दसदृशोऽयमित्यादिव्यवहारभेदानुपपत्तेश्च । किन्त्वाश्रयभेदेन निरूपकभेदेन च नाना ।

तथाच क्वचिदेव कञ्चन धर्ममादाय किञ्चिन्निरूपितं सादृश्यं प्रतीयत इति व्यवस्थानिर्वाहाय यदेव सादृश्यघटकत्वेनाऽभ्युपेयन्तेनैव सादृश्यव्यवहारोपपत्तावतिरिक्तसादृश्ये प्रमाणाभावः ।

किञ्च तव मते सादृश्यस्यातिरिक्तत्वे विसादृश्यमप्यतिरिक्तपदार्थस्स्यात् ।

नच सादृश्याभावेनैव विसादृश्यव्यवहारोपपत्तौ तन्नातिरिक्तमिति वाच्यम् ? विसादृश्यमेवातिरिक्तन्तदभावादेव सादृश्यव्यवहार इत्यस्यापि सुवचत्वात् ।

अथ सादृश्याभाव एव विसादृश्यम् । विशब्दस्य निषेधार्थकत्वेन विसादृश्यमत्रेत्यत्र सादृश्याभाव एतद्वृत्तिरिति प्रतीतेः । सुसादृश्यमत्रेत्यत्र सुशब्दार्थस्याधिकस्य सादृश्येऽन्वयेन अधिकसादृश्यमेतद्वृत्तीति प्रतीतिवदिति चेन्न ? पावनत्वक्षीरवत्त्वादिना सादृश्यविवक्षायां महिष्यां गोसादृश्यं गवये गोविसादृश्यम् इति व्यवहारो न स्यात् । तव मते गवये गोनिरूपितस्यातिरिक्तस्य सादृश्यस्य सत्त्वेन तदभावरूपविसादृश्यस्यासम्भवात् । अभावप्रतियोगिनोरेकत्र विरोधात् ।

नचातिरिक्तस्यापि सादृश्यस्य व्यञ्जकधर्मभेदेन भिन्नतया गवये गोनिरूपितस्य विलक्षणसंस्थानवत्त्वादिव्यङ्ग्यस्य सादृश्यस्य सत्त्वेऽपि पावनत्वक्षीरवत्त्वादिव्यङ्ग्यस्य तस्य तत्रानभ्युपगमेन तदभावरूपविसादृश्यसत्त्वान्नोक्तव्यवहारानुपपत्तिरिति वाच्यम् ? तथा सति आवश्यकत्वात्तत्तद्धर्मैरेव सादृश्यव्यवहारोपपत्तौ अतिरिक्तसादृश्यकल्पने तत्तद्धर्माणां तद्व्यञ्जकत्वकल्पने च गौरवान्नातिरिक्तं सादृश्यम् ।

एवं विसादृश्यस्य सादृश्याभावरूपत्वे विरुद्धधर्मप्रतिसन्धानाभावे विसादृश्यव्यवहारानुदयेन तेषान्तद्व्यञ्जकत्वकल्पने गौरवात् । अभावत्वापेक्षया भावत्वे लाघवाच्च नाभावरूपं विसादृश्यं किन्तु विरुद्धधर्मवत्त्वं विसादृश्यम् समानधर्मवत्त्वं सादृश्यमिति प्राहुः ।

अथैतन्मते समानधर्मवत्त्वस्य सादृश्यस्वरूपत्वे समानत्वस्य सादृश्यापरपर्यायतया आत्माश्रयदोषापत्तिः, धर्मवत्त्वमात्रस्य तत्त्वेऽतिप्रसङ्गादिति चेन्नहि वयं समानधर्मवत्त्वं सादृश्यमिति ब्रूमः । अपितु तद्भिन्नत्वे सति तद्गतसाधारणभूयोधर्मवत्त्वं तत्र तत्सादृश्यमिति तत्र नोक्तापत्तिः समानत्वस्याऽप्रवेशात् ।

अथ पदकृत्यम्—स्वस्मिन् स्वसादृश्यवारणाय सत्यन्तम् । चन्द्रवन्मुखमित्यादिसादृश्यनिरूपके चन्द्रादावतिव्याप्तिवारणाय सत्यन्तमिति वा । अनुयोगितासम्बन्धेन तद्गतभूयोधर्मवत्त्वमिति विवक्षणे तु न तद्भिन्नत्वे सतीत

निवेशः। परन्तु स्वस्मिन् स्वसादृश्यवारणोपायो नास्ति सत्त्यन्तनिवेशातिरिक्त इति विचारणीयः।

चन्द्रभिन्ने सर्वत्र चन्द्रसादृश्यवारणाय (चन्द्रश्चन्द्रसदृश इति व्यवहारापत्तेः) तद्गतभूयोधर्मवत्त्वमिति विशेष्यनिवेशः। तत्रापि धर्मवत्त्वमात्रस्य सर्वत्र सत्त्वाद् भूय इति। सिंहकाकयोरपि घटभिन्नत्वेन सादृश्यवारणाय भूयःपदमितिमान्यतमाः। भूयांसो धर्मा भूयोधर्माः भूयोधर्माणां चन्द्रत्वघटितानामाह्लादकत्वादीनां मुखेऽसत्त्वात्साधारणपदनिवेशः। चन्द्रभिन्ने घटादावपि पटादिग. तसाधारणभूयोधर्मवत्त्वादापत्तिवारणाय तद्गतेति निवेशः। चन्द्रगतसाधारणद्रव्यत्वादिकमादायातिप्रसङ्गवारणाय भूय इत्यपि विचारपद्धतिः। इत्थञ्च चन्द्रभिन्नत्वे सति चन्द्रगतसाधारणभूयोधर्मवत्त्वस्य मुख एव सत्त्वेन तद्भिन्ने तदभावात न तत्सादृश्यव्यवहारप्रसङ्गः। चन्द्रगतसाधारणभूयोधर्माश्च आह्लादकत्ववर्तुलत्वमन्मथोद्दीपकत्वादयः।

वस्तुतस्तु सत्त्यन्तन्नोपादेयमेव। नचैवं चन्द्रगतसाधारणभूयोधर्मवत्त्वस्य चन्द्रेऽपि सत्त्वात् चन्द्रे चन्द्रसादृश्यव्यवहारापत्तौ चन्द्रवच्चन्द्रः चन्द्रश्चन्द्रसादृश इति प्रयोगापत्तिरिति वाच्यम्? चन्द्रे चन्द्रसादृश्यापत्तिर्हि कीदृशी चन्द्रश्चन्द्रसदृश इति शब्दप्रयोगापत्तिर्वा चन्द्रश्चन्द्रसदृश इति वाक्यात्प्रमात्मकशाब्दबोधापत्तिर्वा। नाद्या, कण्ठताल्वाद्यभिघातादिकारणसत्त्वे तादृशशब्दप्रयोगस्य ब्रह्मणोऽप्यशक्यवारणत्वात्। नान्त्या, स्वस्मिन् स्वप्रतियोगिकसंयोगादीनामिव स्वस्मिन् स्वप्रतियोगिकसादृश्यस्याऽप्यनभ्युपगमेन चन्द्रानुयोगिके सादृश्ये चन्द्रप्रतियोगिकत्वाभावादेव प्रमात्वाभावोपपत्तेः।

अत एव चिन्तामणिकारेणापि असाधारणान्यतद्गतबहुधर्मवत्त्वं ग्रामजजात्यादिसाधारणं भेदाघटितत्वाच्च निरवधि तद् गतबहुधर्मवत्त्वं तन्निरूप्यमितीतरनिरूप्यत्वमेव तस्य सप्रतियोगिकत्वम्। तत्रापि सादृश्ये तदेव सप्रतियोगिकत्वम् नतु भेददीर्घादिवत्सावधित्वम्।

तस्मात्सदृश इति प्रत्ययापत्तिरिति ग्रन्थेन भेदाऽघटितमेव सादृश्यमुक्तम्।

अथैवमपि "गगनं गगनाकारं सागरः सागरोपमः। रामरावणयोर्युद्धं रामरावणयोरिवे"ति "अहमिव बहवो भवतो मम तु भवानिव भवानेव" कति कुमुद्वनानि सन्तीन्दोर्विधुरिव विधुरेव कुमुद्वतीनाम्" इत्यादावभेदे कथं सादृश्यबोध

इति प्रश्नः ? उपाधिभेदमादाय गगनसागरयोर्नानात्त्वात(१)युगभेदेन विवक्षणं भेदसत्त्वाच्च । स्थानान्तरीयगगनसागरयोः स्थानान्तरीयतच्छिन्नगगनसागरनिरूपितसादृश्यसम्भवेन युद्धस्यापि दिवसभेदेन स्थलभेदेन प्रकारभेदेन च भिन्नत्वसम्भवात्तत्रापि भेदघटितसादृश्यसम्भवेन चानुपपत्त्यभावात् ।

केचित्तु कालभेदेन सागरादीनां भेदात् भेदनियतसादृश्यमुपपादनीयम् इत्याहुस्तदसत ? कालभेदेन सागरादीनामभेदेऽपि गगनस्य नित्यत्वेन भेदाऽसम्भवेन मदुक्तयुक्तेरेवानुसर्त्तव्यत्त्वात् ।

**आलङ्कारिकमतानुसारिणस्तु**—सादृश्यस्य भेदघटितत्त्वेन गगनं गगनाकारमित्त्यावभेदे सादृश्यन्नास्त्येव। अत एवात्रानन्वयालङ्कारः। अत एव स्वस्मिन् स्वसादृश्यं यत्रेति अन्वर्थस्सङ्गच्छते । अन्यथाऽत्र मुख्यसादृश्यसत्त्वे उपमालङ्कार एव स्यात् नत्त्वनन्वयः । अस्मन्मते च भेदघटितसादृश्याभावात् तत्संस्कारप्रवृत्तोपमाया अविषयत्त्वात् ।

अत एव सादृश्यमुपमाभेदेति उपमालक्षणे भेदग्रहणमनन्वयव्यवच्छेदायेति काव्यप्रकाशिकोक्तिरपि सङ्गच्छते ।

ननु तथाऽप्यनुपपन्ना काव्यप्रकाशिकोक्तिः साधर्म्यस्य भेदघटितत्त्वादेवानन्वयव्युदाससम्भवे स्वातन्त्र्येण पुनर्भेदग्रहणस्य व्यर्थत्त्वादिति चेन्न । अत्रत्त्यसाधर्म्यपदस्य आरोपितानारोपितसाधारणसाधर्म्यपरत्वेनारोपितसाधर्म्यमूलकानन्वयालङ्कारव्यवच्छेदार्थं तदुपादानस्यावश्यकत्त्वात् । भेदघटितस्यापि साधर्म्यस्यारोपितस्य तत्र सत्त्वाद्दत्ते तु वास्तवभेदघटितसाधर्म्यलाभान्नातिप्रसङ्गः, साधर्म्यपदस्य वास्तवसम्भवात् । साधर्म्यपरत्त्वे "हंसीव धवला कीर्त्तिस्वर्गं गामवगाहते" इत्त्यादौ आरोपितसाधर्म्यमूलकोपमायामव्याप्त्यापत्तेरिति वदन्ति ।

**वस्तुतस्तु**—आलङ्कारिकमतेऽपि सादृश्यन्न भेदघटितं गगनं गगनाकारमित्त्यादिषु भेदाघटितसादृश्यसत्त्वेऽपि गगनादौ प्रतियोगित्वरूपसादृश्यान्वयाभावादेवानन्वयालङ्कारोपपत्तेः ।

अत एवानन्वयशब्दस्य अन्वर्थता काव्यप्रकाशिकायाम् भेदाऽघटितसादृश्यस्यानन्वयसाधारणतया भेदग्रहणोपादानञ्च स्वरसत एव सङ्गच्छते इति रहस्यम् ।

---

( १ ) तद्वृत्तिधर्ममात्रस्य तत्र श्लोके इवाद्यर्थत्वेन विवक्षितत्वान्न दोषः तत्तद् युगविशिष्टगगनभेदविवक्षयेत्यर्थ इति नाव्याप्तिरिति परे ।

नन्वेतल्लक्षणस्य "द्वारं द्वारमटन् भिक्षुश्शिक्षत्येवन्न याचते। अदत्त्वा मादृशः माभूर्दत्त्वा त्वं त्वादृशो भवे"त्यभिन्नोपमायामव्याप्तिः। एवं "कमलेव मतिर्मतिरिव कमले"त्युपमेयोपमाया अतिव्याप्तिर्दुरुद्धरैव। तत्र वास्तवभेदनियतसाधर्म्यस्यापि सत्त्वात्, तस्य लक्ष्यत्वस्वीकारे तु अनन्वयेऽपि तत्स्वीकार्यमिति भेदग्रहणानर्थक्यापत्तिरिति चेन्न? द्वारं द्वारमित्यादौ हि जन्मान्तरशरीरावच्छिन्नैतच्छरीरावच्छिन्नयोरेवोपमेयोपमानभावस्य विशिष्टयोर्भेदविवक्षया कविसंरम्भगोचरत्वेनाव्याप्त्यभावात्।

नचैवं गगनं गगनाकारमित्यादावपि औपाधिकभेदस्य कविविवक्षाविषयत्वेनोपमापत्तिरिति वाच्यम्? इष्टापत्तेः। तदविवक्षायामेवानन्वयाभ्युपगमात्। द्वारं द्वारमित्यादौ तु नियमेन कवेर्भेदविवक्षैव तथैव सहृदयहृदयसम्वादात्। उपमेयोपमायास्तु लक्ष्यत्वाङ्गीकाराच्चातिप्रसङ्गः। नितम्बिनी सैव नितम्बिनीवेत्यादावनन्वये अनुपमा नितम्बिनीति प्रतीतेऽस्सर्वातिशयितत्त्वेन निरुपमत्वज्ञानस्य फलत्वात्सादृश्यप्रतीत्यभावेन सादृश्यप्रतीतिप्रयुक्तोपमात्वाऽसम्भवेनालक्ष्यत्त्वात्। अत एव स्वस्मिन् स्वसादृश्यम्वर्ण्यमानमपि नान्वेतीति अनन्वयपदव्युत्पत्तिमपि वदन्ति। उपमेयोपमायान्तु उपमानान्तरव्यवच्छेदप्रयुक्तोत्कर्षस्याधिकस्य प्रतीत्याऽलङ्कारत्वव्यपदेश इति सादृश्यप्रतीत्या उपमात्वस्वीकारात्।

नच तथापि सादृश्यमूलके प्रतीपेऽतिव्याप्तिर्दुरुद्धरैवेति वाच्यम्? चन्द्रधवलच्छपट इत्यादावतिप्रसङ्गवारणाय साधर्म्ये चमत्कारकारित्वविशेषणावश्यकत्वेन "आकर्णय सरोजाक्षि वचनीयमिदम्भुवि। शशाङ्कस्तव वक्त्रेण पामरैरुपमीयत" इत्यादौ पामरैरित्युक्त्या गोसदृशो गवय इत्यादाविव चमत्कारकारिसादृश्यप्रतीत्यभावेनानतिप्रसङ्गात्। यत्र च चमत्कारकारि सादृश्यं प्रतीयते,

> यत्त्वन्नेत्रसमानकान्तिसलिले मग्नन्तदिन्दीवरं,
> मेघैरन्तरितःप्रिये तव मुखच्छायानुकारी शशी।
> येऽपि त्वद्गमनानुसारगतयस्ते राजहंसा गताः,
> स्वसादृश्यविनोदमात्रमपि ते दैवेन न क्षम्यते॥

इत्यादौ तस्य चोपमेयोपमावत् लक्ष्यत्वमेव। अत एव "गर्वमसम्भाव्यमिमं लोचनयुगलेन किम्वहसि भद्रे। सन्तीदृशानि दिशि दिशि सरस्सु ननु नीलनलि-

नानी''त्यादिप्रतीपमुपमेयोपमा चेत्युभयमपि संग्राह्यमेवेति तद्व्यापनं लक्षणस्य न दोष इति मीमांसायामप्पयदीक्षिताः।

यत्तु केनचिदालङ्कारिकम्मन्न्येनोक्तमुपमेयोपमाऽलक्ष्याः प्रतीपः सर्वोऽप्यलक्ष्य एव अनन्वयवत् तत्र विलक्षणसादृश्यप्रतीत्यभावात्। अत एव "अहमेव गुरुस्सुदारुणानामिति हालाहल मास्म तातदृप्यः। ननु सन्ति भवादृशानि भूयो भुवनेऽस्मिन् वचनानि दुर्जनानामि''त्यादिप्रतीपस्तु लक्ष्य एवेति दीक्षितमतमप्यपास्तम्। सादृश्यप्रतीतिमात्रात्तल्लक्ष्यत्वाङ्गीकारेऽनन्वयेऽपि तत्स्वीकारापातात्। विलक्षणतत्प्रतीतेस्तु उभयत्राऽप्यभावादिति यत तत्तु दीक्षितग्रन्थभावार्थानवबोधकत्वादुपेक्ष्यम्। तथाहि लक्ष्यतावच्छेदकसत्त्वमेव लक्ष्यत्वे वीजम्, तदसत्त्वन्त्वलक्ष्यत्वे वीजम्। उपमितिक्रियानिष्पादकत्वं हि उपमापदप्रवृत्तिनिमित्तम्। तदेव च लक्ष्यतावच्छेदकम्। उपमाशब्दस्तावत् उपपूर्वान्माते करणे व्युत्पन्नः सादृश्यज्ञानहेतुव्यापारमभिधत्ते, भावव्युत्पन्नस्तादृशं सादृश्यज्ञानम्।

तथा च गगनं गगनाकारमित्यादौ स्वेन सादृश्यवर्णनया सदृशान्तरव्यवच्छेदे सति वस्तुतस्स्वेनाऽप्युपमाया असम्भवात अनुपमं गगनादिकमित्यत्रैव कविसंरम्भ इत्युपमितिक्रियाया अनिष्पत्तेरनन्वयस्याऽप्यलक्ष्यत्वम्। एवं प्रतीपेऽपि यत्रोपमितिक्रियाया अनिष्पत्तिराकर्णयेत्यादौ तदप्यलक्ष्यम्।

अथाहमेवेत्यादिप्रतीपस्य कथं लक्ष्यत्त्वम्, तत्रापि हालाहलस्यातिप्रकृष्टदोषत्वादुपमानभावमसहमानस्य सादृश्यप्रतियोगितया प्रतिपादनेन उपमितिक्रियाया अनिष्पत्तिरिति चेदात्मानमेवोपालभस्व नहि दीक्षितैरहमेवेत्यस्य लक्ष्यत्वमुक्तं प्रत्युतालक्ष्यत्वस्यैव पूर्वं प्रतिपादितत्वात। किन्तु गर्वमसम्भाव्यमित्यादेस्तत्रोपमितिक्रियानिष्पत्तिसत्त्वात्। एवमुपमेयोपमायामप्युपमितिक्रियानिष्पत्तिसत्त्वाल्लक्ष्यत्वमेव। तच्च तवाऽप्यनुमतम्। तत्रादिपदग्राह्यमहमेवेत्यादिकन्तु स्वभ्रान्त्युद्घाटनमेव। तस्याकर्णयेत्यादिसमशीलत्वस्य तैरेवावेदितत्वात्।

आदिपदग्राह्यन्तु यत्त्वन्नेत्रेत्यादिकमेव। एवञ्च गर्वमसम्भाव्येत्यादौ लक्ष्यतावच्छेदकसत्त्वात् सकलसहृदयहृदयसंवादिविलक्षणचमत्कारकारिसादृश्यप्रतीतिसत्त्वाच्च। उपमात्वस्य ब्रह्मणोऽप्यशक्यपरिहारतया उपमेयोपमा लक्ष्या प्रतीपस्सर्वोऽप्यलक्ष्य एवेति चोक्तेः स्वस्यालङ्कारिकतानभिज्ञत्वं प्रकटयति। एतेनोपमाभि-

न्नस्योपमाया अलक्ष्यत्वात्प्रतीपं सर्वमलक्ष्यमिति प्रत्युक्तम्, उपमेयोपमालक्ष्यत्वस्य संमतत्त्वात् ।

यदपि लक्ष्यतावच्छेदककोटौ उपमितिक्रिये यस्य सादृश्यप्रतीतिश्चेदित्यर्थः तदानन्वयेऽपि तदस्त्येव, भेदगर्भतत्प्रतीतिश्चेद् भेदांशनिवेशेन तद्वारणमेव किंमूलकम्? स्वेतरसादृश्यविरहरूपस्य निरुपमत्वस्य स्वसादृश्यस्य च तत्र युगपत् प्रतीत्यविरोधात् । तथा चानन्वयत्वमुपमात्वञ्चाविरुद्धमेव । उपमेयोपमात्ववत् इत्यादि कैश्चिदुक्तम् । तदपि न ? पूर्वोपदर्शितरीत्या भेदांशानिवेशेऽपि स्वस्मिन् स्वप्रतियोगिकसादृश्याऽसम्भवेन अनन्वये स्वसादृश्यप्रतीत्यसम्भवात् इति मात्सर्यमपहाय सुधीभिराकलनीयम् अलं प्रसङ्गागतविचारेण ।

ननु तथापि भूयस्त्वस्य सर्वसाधारणस्य दुर्वचत्वादननुगमो लक्षणे दोष इति चेन्न ? भूयस्त्वस्य बहुत्वरूपतया तस्य च त्रिचतुरादिसाधारणत्वेनानुगतत्त्वात् । अत्र कश्चित्–व्यञ्जकतत्तद्धर्माणां सादृश्यप्रतीतिविषयत्वकल्पनामपेक्ष्यैकस्यातिरिक्तस्य सादृश्यस्य तद्विषयत्वे लाघवादतिरिक्तसादृश्यसिद्धिरिति तन्न ? तत्तद्धर्माणां व्यञ्जकत्वस्यातिरिक्तसादृश्यस्य धर्मिणः तस्मिन् सादृश्यप्रतीतिविषयत्वस्य च कल्पनामपेक्ष्य तत्तद्धर्माणां सादृश्यप्रतीतिविषयत्वकल्पनायामेव लाघवात् ।

किञ्च तत्तद्धर्माणां सादृश्यप्रतीतिविषयत्वे प्रकारान्तरेणापि सादृश्यलाघवसम्भवस्तथाहि चन्द्रसदृशं मुखमित्यादिशाब्दसामग्रीकाले मुखादावाह्लादकत्वादितत्तद्धर्माभावाद्युपनीतभानादिवारणाय तत्र तादृशसामग्र्याः प्रतिबन्धकत्वमतिरिक्तसादृश्यवादिनाऽवश्यमङ्गीकार्यमिति गौरवम् । मन्मते च तादृशशाब्दसामग्रीकाले मुखादौ तत्तद्धर्मप्रकारकज्ञानस्य योग्यताज्ञानविधयाऽवश्यकत्वेन तेषां बाधमुद्रया बलवद्विरोधित्वेनैवोपपत्तावतिरिक्तप्रतिबन्धकत्वाभावेऽपि न क्षतिः ।

एतेन सादृश्यस्यातिरिक्ततामते साधारणभूयोधर्मत्वरूपसादृश्यत्वस्य अनुगतस्य इवादिपदशक्यतावच्छेदकत्वकल्पनं गौरवमिति परास्तम् । उपदर्शितरीत्या इवादिपदघटितशाब्दसामग्र्यास्तत्तद्धर्माभावाद्युपनीतभानादौ प्रतिबन्धकत्वाकल्पनेन लाघवसम्भवात् ।

केचित्तु—सादृश्यस्यातिरिक्तत्वेऽपि तस्याश्रय भेदेन(१)निरूपकभेदेन च नानात्वादनुगताकारप्रतीत्यनुपपत्तिरिति सादृश्यत्वमेव इयमतिरिक्तं स्वीकार्य्यम् । तथाच व्यञ्जकत्वेन क्लृप्ततत्तद्धर्मं चातिरिक्तसादृश्यत्वाङ्गीकारेणोपपत्तौ कृतमतिरिक्तसादृश्येनेति । तदसत् ? निरुक्तसादृश्यत्वेनैव निर्वाहे अतिरिक्तसादृश्याङ्गीकारे मानाभावादिति दिक् ।

इति जौनपुरमण्डलान्तर्गत उदयपुरगोलहवा बदलापुराभिजन कौमुदीकल्पलतिका-परिष्कारदर्पणव्युत्पत्तिवादशास्त्रार्थकलापरिभाषेन्दुशास्त्रार्थकलादिविंशत्यधिक-ग्रन्थनिर्माणकर्त्तृघटिकाशतकशतावधानसंस्कृताशुकविवैयाकरणशिरो-मण्याद्यनेकपदवीकसुप्रसिद्धशास्त्रार्थि-पण्डितराज-शुक्लश्रीवेणी-माधवशास्त्रिविरचिता सादृश्यशास्त्रार्थकला समाप्ता ।

---

( १ ) चन्द्रवन्मुखमित्यत्र तत्पदेन उपमानभूतश्चन्द्रो ध्रियते । तथाच चन्द्रभिन्नत्वे सति चन्द्रवृत्त्याल्हादकत्वरूपभूयोधर्मवत्त्वमपि मुखे वर्तते इति भवति सादृश्यम् । सादृश्यं हि यत्किञ्चित्प्रतियोगिकं यत्किञ्चिदनुयोगिकं च भवति । यस्य सादृश्यं स एव सादृश्यप्रतियोगी ( उपमानमिति यावत् ) यत्र सादृश्यं नीयते स एव सादृश्यानुयोगी ( उपमेय इति यावत् ) उपमीयते येन तदुपमानम् । उपमीयते यस्स उपमेयः । चन्द्रवन्मुखमित्यत्र चन्द्रप्रतियोगिकसादृश्यानुयोगि मुखमिति बोध उपमेयं मुखम् , उपमानश्चन्द्रः । भूवादिसूत्रे उपमानं वा इति उपमेयाश्च भूप्रभृतयः वाप्रतियोगिकसादृश्या ( नुयोगिनः ) श्रया भूप्रभृतयः । सादृश्यग्राहक-सादृश्यप्रतियोगितावच्छेदकेतिनियमे चन्द्रवन्मुखमित्यादिलक्ष्यानुरोध एव मानम् । व्यापकत्वञ्च स्वाधिकरणवृत्त्यत्यन्ताभावाप्रतियोगित्वम् ,स्वाधिकरणवृत्तिभेदप्रतियोगितानवच्छेदकत्वम् । सहजतस्तु अधिकदेशवृत्तित्वं व्यापकत्वम् । न्यूनदेशवृत्तित्वं व्याप्यत्वम् । चन्द्रत्वं केवलचन्द्रवृत्ति आल्हादकत्वन्तु चन्द्रेऽपि कामिन्यामपि पुत्रेऽपि सुहृदादावपि वर्तते, इति चन्द्रत्वापेक्षया भवति व्यापकत्वमाल्हादकत्वस्य । एवमेव "भूवादयोधातवः" इतिपाणिनीये वात्वं केवलवावृत्ति क्रियावाचित्वन्तु वाभ्वाद्यनल्पसङ्ख्याकेषु इति भवति तस्य व्यापकता ।

# लःकर्मशास्त्रार्थकला

ध्यायन्ध्यायम्परम्ब्रह्म स्मारं स्मारं गुरोर्वचः ।
लःकर्मशास्त्रार्थकलान्तनोमि विदुषाम्मुदे ॥ १ ॥
कृतावेव लकाराणां शक्तिर्ज्ञेया मनीषिभिः ।
शाब्दिकानां निकाये तु गौरवन्दृश्यतेऽधिकम् ॥ २ ॥

आख्यातस्य कृतौ शक्तिर्नतु कर्त्तरि कर्तृत्वञ्च कृत्याश्रयत्वमेव हि तच्च कृतिरूपमित्यनन्तपाकानुकूला कृतिर्गमनानुकूला कृतिः पाठानुकूला कृतिरित्यादिकृतीनां शक्यतावच्छेदकत्वे गौरवमपरिमितमेव । नच "कर्त्तरि कृदिति" सूत्राच्चकारबलेनानुकृष्टं कर्त्तरीति पदं स्वदेशे कर्तृरूपार्थकम् अन्यत्र "लःकर्मणी"तिसूत्रे कृतिरूपार्थबोधकत्ववैषम्ये शब्दार्थमर्यादाभङ्ग इति । किञ्च कृधातोः कर्त्तरि तृचि कृते कर्तृशब्दो निष्पद्यते तस्य कृतिरूपार्थकत्वे प्रमाणविरहश्चेति वाच्यम् ? शब्दमात्रमनुवर्त्यार्थस्स्वेच्छया क्रियत इत्यर्थकशब्दाधिकारमाश्रित्य कर्तृपदे भावे तृच् "कृत्यल्युटो बहुल"मित्यत्र बहुलग्रहणं कृन्मात्रस्यार्थव्यभिचारार्थमित्युक्तेः । तथा च भावे तृचि कारणकृतिकर्तृपदानां समानार्थकत्वेन कृतौ शक्तिस्वीकारे लाघवाधिक्यात् ।

कर्तृत्वस्य कृतिरूपत्वमभिधीयते कैश्चित्, तत्तुच्छम्—कर्त्ता व्यापाराश्रयः स्वप्रत्ययार्थौ भावः कारणं कृतिर्यत्नविशेषः तृजर्थस्त्वप्रत्यये क्वापहृतो भवेत् तस्माद् भावे तृजिति मदुक्त एव प्रकारो ज्यायान् । किञ्च वैयाकरणमते आश्रयत्वविशिष्टावच्छिन्नवाचकताज्ञानाश्रयत्वत्वावच्छिन्नाश्रयत्वप्रकारकोपस्थित्योः कार्यकारणभावे गौरवम् शक्यतावच्छेदकतयोस्सखण्डत्वात् । एवं भिन्नविषयकप्रत्यक्षत्वावच्छिन्नम्प्रति शाब्दसामग्र्याः प्रतिबन्धकत्वमिति नियमानुरोधेन शाब्दसामग्रीघटकाश्रयत्वप्रकारकोपस्थितेः आश्रयत्वप्रकारतानिरूपितविशेष्यत्वावच्छिन्नाश्रयत्वप्रकारताकोपस्थितित्वेन, एवम्विशेष्यतानिरूपितप्रकारत्वावच्छिन्नाश्रयत्वनिष्ठविशेष्यतानिरूपिताश्रयत्वप्रकारकोपस्थितित्वेन इति विनिगमकाऽभावेन प्रतिबन्धकताधिक्यम् अवच्छेदकगौरवञ्चेति ।

कृतिशक्तिवादिनान्तु तण्डुलम्पचतीति वाक्यजन्यशाब्दबुद्धित्वावच्छिन्नम्प्रति "ति" पदं कृतिविषयकबोधजनकत्वप्रकारकभगवदिच्छीयविषयतावदित्याकारकशक्तिज्ञानजन्यकृतित्वप्रकारकोपस्थितित्वेन कारणता । तत्र कृतिविषयकोपस्थितिशक्तिज्ञानयोऽकार्यकारणभावे लाघवम् । कृतित्वजातेश्शक्यतावच्छेदकत्वात् । एवं भिन्नविषयकप्रत्यक्षत्वावच्छिन्नम् प्रत्यपि शाब्दसामग्र्याऽप्रतिवन्धकतया (कृतित्वप्रकारकोपस्थितित्वेन) लघुधर्मेण च प्रतिबन्धकत्वाच्च लाघवमिति । नच वैयाकरणानाम्मते आश्रयत्वस्याखण्डोपाधिरूपतयाऽनिर्वचनीयत्वेन स्वरूपतो भानस्वीकारान्न शक्यतावच्छेदकता गरीयसी, नापि विनिगमनाभावेन प्रतिबन्धकताधिक्यम् अवच्छेदकगौरवञ्चेति वाच्यम् ? तत्तदाश्रयभेदेनाश्रयत्वस्य भिन्नत्वादन्यथा चैत्रनिष्ठाश्रयत्वव्यक्तेश्शक्यतावच्छेदकत्वे मैत्रऽपचतीति वाक्यस्याऽप्रामाण्यप्रसङ्गात् । नच सकलाश्रयनिष्ठाश्रयत्वं लाघवादेकमेवेति वाच्यम्? अधिकरणपदार्थस्य सखण्डत्वेन समवायसम्बन्धावच्छिन्नत्वनिवेशाऽसम्भवेन कालिकसम्बन्धेन पाकस्य काले सत्त्वेन कालऽपचतीति वाक्यप्रामाण्यापत्तेः । किञ्च समवायसम्बन्धावच्छिन्नत्वनिवेशेऽपि शाब्दिकमते आश्रयत्वस्यैक्येन समवायसम्बन्धावच्छिन्नाश्रयतायाऽकालिकसम्बन्धावच्छिन्नाश्रयतायाश्च अभेदात्पाकनिरूपिताश्रयत्वस्य काले सत्त्वेन तादृशप्रयोगापत्तेस्तौष्ट्याच्च । किञ्च सकलाश्रयनिष्ठाश्रयत्वस्यैकत्वे समवायेन वह्न्याश्रयत्ववान् वह्न्यवयव इतिवत् संयोगेन वह्न्याश्रयत्ववान् वह्न्यवयव इति प्रयोगापत्तेः। किञ्च संयोगेन वह्न्यधिकरणतावान्पर्वत इत्यत्र तृतीयान्तार्थसंयोगावच्छिन्नत्वस्यान्वयभङ्गप्रसङ्गः, अधिकरणत्वस्याखण्डत्वेन शाब्दिकनये सम्बन्धानवच्छिन्नत्वात् । नच संयोगसम्बन्धावच्छिन्नवह्नित्वावच्छिन्नाधेयतानिरूपकत्वविशिष्टाधिकरणतात्वावच्छिन्नाधिकरणत्वस्य वह्न्यवयवे विरहान्न पूर्वदोष इति वाच्यम् ? तादृशाधिकरणतात्वावच्छिन्नाधिकरणत्वस्य पुनरप्यधिकरणत्वाऽभिन्नतया तत्र नास्तीति कथनस्य सर्वथैवाशक्यत्वात् । किञ्च विशिष्टसत्तानिष्ठाऽधेयत्वस्य शुद्धसत्तानिष्ठाऽधेयत्वस्य चानतिरिक्तत्वपक्षे समवायसम्बन्धावच्छिन्नविशिष्टसत्तानिष्ठाधेयतानिरूपकाधिकरणत्वस्य गुणादौ सत्त्वेन समवायेन विशिष्टसत्ताधिकरणत्ववान् गुण इति प्रतीतेर्दुर्वारत्वात् ।

नैयायिकमते तु अधिकरणताया नानात्वात्समवायसम्बन्धावच्छिन्नगुणकर्मान्यत्वविशिष्टसत्तात्वावच्छिन्ननिरूपकतानिरूपिताधिकरणत्वस्य तत्राऽभावात्पूर्वो-

कप्रतीतेरसम्भवात् । नचाश्रयत्वस्य नानात्वेऽपि समवायस्यैक्येन समवायसम्बन्धाव-च्छिन्नाधिकरणताया ऐक्यात्तादृशाधिकरणत्वमेव शक्यतावच्छेदकमस्तु काले समवायेन व्यापारस्याऽसत्त्वेन कालःपचतीति पूर्वदोषोनास्तीति वाच्यम् ? सम्बन्धैक्येनाधिकरणत्वस्यैक्यस्वीकारे जलनिष्ठसमवायसम्बन्धावच्छिन्ननिरूपकताधिकरणतातो वह्नित्वावच्छिन्नसमवायसम्बन्धावच्छिन्ननिरूपकताधिकरणत्वस्याभिन्नतया समवायेन वह्न्यधिकरणतावज्जलं समवायेन जलत्वाधिकरणतावांश्च पर्वत इत्यादिप्रतीतेरनिवार्य्यत्वात् । नच समवायसम्बन्धावच्छिन्नवह्नित्वावच्छिन्नाधिकरणतात्वावच्छिन्नस्वरूपसम्बन्धावच्छिन्नाधिकरणत्वस्य जले बाधान्नापत्तिरिति वाच्यम् ? स्वरूपसम्बन्धावच्छिन्नाधिकरणत्वस्यानेकत्वाभावेन जलत्वाधिकरणत्वात्तादृशाधिकरणत्वाधिकरणत्वस्य जले सत्त्वात् । किञ्च पर्वतीयरूपस्य समवायेन पर्वते सत्त्वेन समवायेन पर्वतीयरूपाधिकरणत्ववान्पर्वत इतिप्रतीतिसत्त्वात् समवायेन वह्न्यधिकरणत्ववान् पर्वत इतिप्रतीतेश्च निराकर्त्तुमशक्यत्वात् । तथा च आश्रयत्वमभिन्नमिति कालःपचतीत्यापत्तेस्तादवस्थ्यात कृतावेव शक्तिर्नतु कर्त्तरीति ।

किञ्च "लःकर्मणी" तिसूत्रे "कर्त्तरि कृदि" तिसूत्रादाकृष्टं कर्त्तरीति कृतिविशिष्टसामान्यं लकाराणामर्थम्बोधयति । कृत्याश्रये शक्तिर्नतु आश्रये, कृतित्वजातेरेव शक्यतावच्छेदकतावच्छेदकत्वेन लाघवात् ।

नच कर्तृत्वन्नहि कृतिविशिष्टत्वमपि तु व्यापाराश्रयत्वम् "अनन्यलभ्यो हि शब्दार्थः" इतिन्यायेन व्यापारस्य धातुलभ्यत्वेन आश्रयमात्रं लकारार्थः, आश्रये शक्तिः आश्रयस्य चैत्रादिपदाल्लाभेऽपि आश्रयत्वेन सामान्येन लाभाऽभाव इति वाच्यम् ? अचेतनस्याऽपि काष्ठादेःकर्तृत्वप्रसङ्गात् । नच रथो गच्छतीत्यादावचेतनस्य रथादेःकर्तृत्वाऽसम्भवेनाश्रये लक्षणया बोधनेष्टापत्तिरिति वाच्यम् ? पाककर्तृत्वावच्छिन्नाधेयतानिरूपितोद्देश्यतावच्छेदकत्वेन वक्तृजिज्ञासितो यो धर्मस्तद्वान्पचतीत्याकारकान्वयबोधजनकं यत्किञ्चिद्धर्मावच्छिन्नोद्देश्यताकपाककर्तृत्वविधेयकज्ञानम्भवत्वित्याकारकजिज्ञासायां प्रयुक्तं कःपचतीतिवाक्यम् । तस्य श्रवणानन्तरं चैत्रःपचति ब्राह्मणःपचतीत्यादिकमेव लोक उत्तरवाक्यम्प्रयुङ्क्ते न तु काष्ठम्पचतीति । इदानीम्वैयाकरणनये तादृशवाक्यस्याऽपि उक्तेच्छानिवर्त्तकत्वेन प्रयोगापत्तेर्लोके तु कृतिर्यत्नविशेषस्तद्विशिष्ट एव कर्त्ता न तु व्यापारविशिष्टो-

ऽपि । किञ्च पचतीत्यस्य पाकं करोतीत्येव विवरणं श्रूयते न तु पाकाश्रयव्यापारा-श्रय इति । तदेव किं करोति ? पचति–इतिप्रश्नोत्तरयोस्समानार्थकबोधजनकत्वानु-रोधेन कृधातोरिव लकाराणां कृतिवाचकत्वं सुलभमेव । नच कृधातोर्यत्नार्थकत्वे बीजादिनाङ्कुरः कृत इत्यादौ अङ्कुरे यत्नाऽभावात्कथं शाब्दबोध इति वाच्यम् ? तत्र कृधातोरुत्पत्त्याश्रये लक्षणास्त्राकारेणापत्तिविरहात् । नच "लः कर्मणी" ति-सूत्रे कृतिपदार्थश्रवणं कथमिति वाच्यम् ? पचतीत्यादौ पाकानुकूलकृत्याश्रयो देव-दत्त इति बोधात्कृतिविशिष्टविषयकबोधजनकत्वेन कृतिविशिष्टविषयकबोधजनका लकारा भवन्तीति । नच "तिङ्समानाधिकरणे प्रथमेति" वार्त्तिकात्तिङर्थाऽभिन्नार्थ-बोधकपदात्प्रथमेति श्रुतिस्तथा च तिङर्थकृत्यभेदस्य चैत्रे बाधात्पचति चैत्र इत्या-दीनामसिद्धिरिति वाच्यम् ? समवायस्वरूपान्यतरसम्बन्धेन तिङर्थान्वितार्थबोधक-पदात्प्रथमेत्येव व्याख्यानात् तिङर्थकृतेस्समवायेन चैत्रे सत्त्वात् । न च प्रसिद्धार्थेन "लः कर्मणी"तिस्मृतिविरोध इति कथं कृतौ शक्तिरिति वाच्यम् ? नहि वाच्य-वाचकभावो व्याकरणस्मृत्यधीनस्तस्यान्वयव्यतिरेकगम्यत्वात् । नच शब्दाधि-कराश्रयेण कृतिपरत्वस्वीकारे प्रमाणाऽभाव इति वाच्यम् ? शानजादौ पचमान इत्यादौ सत्त्वभूतो भावोऽर्थः, भूयते इत्यादावसत्त्वभूतो भावोऽर्थ इति वैधर्म्यस्य सर्वसिद्धत्वात् । नचाचेतने रथो गच्छतीत्यादौ लक्षणया लक्ष्यतावच्छेदकगौरवं नै-यायिकमते वैयाकरणमते शक्यतावच्छेदकस्येति साम्यमेव न गौरवमिति वाच्यम् ? अतिरिक्तशक्तिकल्पनापेक्षया क्लृप्तायां शक्तिसम्बन्धरूपलक्षणायां गौरवाऽभा-वात् । नच लक्षणाऽऽश्रयणे सकृदुच्चारितश्शब्दस्सकृदर्थं गमयतीति न्यायेन वृत्तिद्वया-ऽनभ्युपगमात्कथम्वर्त्तमानत्वादीनामन्वय इति वाच्यम् ? शक्ततावच्छेदकलक्ष्यता-वच्छेदकभेदात् लट्त्वेन वर्त्तमानत्वे शक्तिर्लकारत्वेन लक्षणा लकारत्वलट्स्वरूप-शक्ततावच्छेदकभेदात् । नच लक्षणाज्ञानजन्याऽऽश्रयत्वाद्युपस्थितेरेककालावच्छेदेन हेतुत्वकल्पने गौरवमिति वाच्यम् ? तद्विषयकशाब्दबोधम्प्रति तद्विषयकवृत्तिज्ञानज-न्योपस्थितित्वेनैव हेतुतया लक्षणाज्ञानस्य पृथक् हेतुत्वाऽभावात् । नचानुकूलाभेदा-दिसंसर्गाणां कथं शाब्दबोधविषयत्वं वृत्त्याऽनुपस्थितत्वात्, किञ्च संसर्गविषयकशा-ब्दबोधोऽस्ति वृत्त्योपस्थितिर्नास्तीति कार्यदलं गच्छति अर्थात्कार्यमस्ति हेतुदला-ऽगमनेन हेतुर्नास्ति हेतोः कार्यतावच्छेदकानाक्रान्तत्वन्दोष इति वाच्यम्? संसर्ग-भिन्नतद्विषयकशाब्दबोधम्प्रति तद्विषयकवृत्तिज्ञानजन्योपस्थितेः कारणत्वात् ।

तद्धर्मप्रकारकतद्धर्मावच्छिन्नविशेष्यकशाब्दबुद्धित्वावच्छिन्नम्प्रति तद्धर्मप्रकारकतद्धर्मविशेष्यकवृत्तिज्ञानाधीनोपस्थितेः कारणत्वात्। संसर्गाणां तद्धर्मप्रकारकत्वाऽभावेन दोषाऽभावात्। नच वृत्त्यनुपस्थितानुकूलाभेदादिसंसर्गाणां शाब्दबोधविषयत्वे राजपुरुष इत्यादौ जन्यजनकादियावत्संसर्गभानापत्तिरिति वाच्यम्? तात्पर्यस्य नियामकत्वात्। शाब्दबोधे ह्येकपदार्थेऽपरपदार्थस्य संसर्गस्संसर्गमर्यादया भासते। नच किं करोति किम्विषयको यत्न इत्येवं यत्नार्थककरोतिना प्रश्ने पचतीत्युत्तरदर्शनादाख्यातस्य यत्नार्थत्वे कृञो यत्नार्थत्वे यतिवत् कृञोऽकर्मकत्वापत्तौ घटं करोतीतिवत् घटं यतते इति प्रयोगापत्तिरिति वाच्यम्? सकर्मकोऽपि धातुर्विवक्षयाऽकर्मको भवति "धातोरर्थान्तरे वृत्तेर्धात्वर्थेनोपसंग्रहात्" इत्युक्त्या विवक्षाधीनत्वेन तत्र नैयायिकमते दोषाऽभावात्।

नच क्रियते घटस्स्वयमेवेत्यादौ कर्मवद्भावानापत्तौ यगाद्यनापत्तिः कर्मावस्थायां या क्रिया सा कर्त्रवस्थायाञ्चेत्तदैव "कर्मवत्कर्मणे" त्यस्य प्रवृत्तिः, कृतिश्च न घटादिनिष्ठा–प्रश्नवाक्ये यत्नविशिष्टे जिज्ञासितसम्बन्धः उत्तरवाक्ये तु आश्रयत्वादिसम्बन्ध इति वैषम्यात्। तथा च कृञो यत्नार्थत्वन्न योग्यमिति वाच्यम्? अनेकार्था अपि धातवो भवन्ति धातूनामनेकार्थत्वात्तत्त दृष्टप्रयोगानुरोधेन धातूनान्तत्तदर्थपरिकल्पनात्।

नच पच्यते तण्डुलेनेत्यादौ नैयायिकमते "कर्मवत्कर्मणे" त्यतिदेशात्कर्मणि द्वितीयापत्तिः, वैयाकरणमते तु "लिङ्याशिष्यङिति" द्वित्वकारकाल्ल इत्यनुवृत्तेर्ल्लकारवाच्यस्यैव कर्त्तुः कर्मवत्त्वेन भावे लकारे तेन कर्त्तुरनुपस्थितेरदोष इति वाच्यम्? लकारवाच्यकृत्याश्रयः कर्त्ता कर्मवदिति सूत्रार्थेन लकारवाच्यकर्तृत्वाश्रयः कर्त्ता कर्मवदिति लक्षणया परिकल्पितेनार्थेन च दोषाऽभावात्कृतावेव शक्तिरिति पक्षस्य निर्विवादत्वात्।

नच वैयाकरणमते आख्यातार्थाश्रयप्रकारकबोधम्प्रति प्रथमान्तपदजन्यबोधो हेतुः, तदर्थसंख्याप्रकारकबोधे तदर्थाश्रयज्ञानं हेतुः, तदर्थकत्वप्रकारकबोधे धातुजज्ञानं हेतुरिति कार्यकारणभावत्रयज्ञानं नैयायिकमते तु काल इष्टसाधनत्वाद्यतिरिक्ताख्यातार्थबोधे प्रथमान्तपदजन्योपस्थितिः कारणमिति संख्याभावनयोरेक इति वाच्यम्? आख्यातत्वाद्यजानत ईदृशकार्य्यकारणाभावग्रहाऽसम्भवात्। किञ्च आख्यातेन क्वचित्कृतेः क्वचिदाश्रयत्वस्य बोधः कृतेः क्वचिद्धातुना क्वचित्प्रत्ययेन बोध

इत्यर्थस्य पर्यवसितत्वेनानेककार्यकारणभावापत्तेः । नच लकाराणां कृतौ शक्तिस्वीकारे पच–अजर्घा अजकात् इत्यादौ प्रत्ययानां लोपेन अस्यापत्यमिरियानितिवच्छिष्यमाणो लुप्यमानार्थाऽभिधायीति न्यायेन यत्नकालसंख्यानां धातुवाच्यत्वावश्यकत्वेन सामान्यरूपेण प्रत्ययशक्तिकल्पने गौरवमिति वाच्यम् ? शास्त्रमात्रेऽवशिष्टानां सर्वाधिकारवत्त्वस्याऽगत्या स्वीकारात् । नच पचन्तं चैत्रम्पश्येत्यादौ सामानाधिकरण्यानुपपत्तौ शतृप्रत्ययो न स्यादिति वाच्यम् ? "ल꣡कर्मणि च" तिसूत्रस्य "लटश्शतृशानचा" वित्यनेनैकवाक्यतयाऽभीष्टसिद्धेः । नच तिङर्थाऽभिन्नत्वं हि तिङ्सामानाधिकरण्यमिति कृतौ शक्तिस्वीकारे पुरुषव्यवस्था न सिद्ध्येदिति वाच्यम् ? तत्र समानाधिकरणपदबलात्तिङ्वाच्यकारकवाचिनीत्यर्थवत्समवायस्वरूपान्यतरसम्बन्धेन तिङर्थान्वितार्थबोधके युष्मद्युपपदे इत्यर्थेन दोषाऽभावात् । अत एव अतित्वम्भवतीत्यत्र न मध्यमपुरुषव्यवस्था ।

नच पच्यते तण्डुलेनेत्यत्र कथन्निर्वाह इति वाच्यम् ? समवायसम्बन्धेन लकारार्थान्वितार्थ꣡कर्त्ता कर्मवदिति कर्मवत्कर्मणेत्यस्यार्थेन दोषाऽभावात् । किञ्च "ल꣡कर्मणि च" द्व्येकयोर्द्विवचनैकवचने" बहुषु बहुवचनम्" इत्यादिसूत्राणां "तिप्तस्झीति" विधिशास्त्रेण सहैकवाक्यतया कर्त्तुरेकत्वे विवक्षिते एकवचनात्मको लकारः, द्वित्वे विवक्षिते द्विवचनात्मको लकारः, एवमेव तिबादीनाम्विधानमिति । अत एव महाभाष्ये यदेकत्वादयो विभक्त्यर्थास्तदा इति । अत एव

सर्वाण्येव हि शास्त्राणि स्वप्रदेशान्तरैस्सह । एकवाक्यतया युक्तमुपदेशम्प्रतन्वते ।

इत्यभियुक्तोक्तिस्सङ्गच्छते । नच कृतिशक्तिवादे चत्र꣡पचतीत्यादावभिहितानभिहितव्यवस्थानुपपत्त्या तृतीयापत्तिरिति वाच्यम् ? कर्त्तृगतसंख्याऽनभिधाने तृतीयेत्यर्थस्य जल्पनीयत्वात्, कर्मत्वादिरहितप्रथमान्तपदोपस्थाप्यस्य चैत्रादेस्संख्याभिधानयोग्यत्वात्। इतरविशेषणत्वेन तात्पर्याविषयत्वमित्यर्थः । अतएव चत्र इव मैत्रो गच्छतीत्यत्रापि न तृतीयापत्तिरिति । संख्याकर्त्रोरन्यतराभिधाने तृतीयेत्यर्थेन कल्पितेनादोषाच्च । नच कर्त्तरि शक्तौ अनन्तकृतीनां शक्यतावच्छेदकत्वे गौरवमन्यवादि तत्कथं लक्ष्यतावच्छेदकत्वस्येव शक्यतावच्छेदकस्य गुरुणि स्वीकारे बाधकाऽभावः अन्यूनानतिरिक्तवृत्तित्वरूपस्यावच्छेदकस्य गुरुधर्मेऽपि सत्त्वम्, अवच्छेदकत्वञ्चातिरिक्तपदार्थ꣡किन्तु स्वरूपसम्बन्धस्तत्तत्स्वरूपमेवेति

तस्यावच्छेदकत्त्वे न हानिः । नच सम्भवति लघौ गुरौ नावच्छेदकत्त्वम् कम्बुग्रीवादिमान्नास्तीतिवत् इति वाच्यम् ? यत्र लघुगुरुभ्यामन्वोधो निर्विवादस्तत्रैव लघुधर्मावच्छिन्ने शक्तिश्शक्यतावच्छेदकञ्च । प्रकृते तु प्रत्ययात्कृतित्त्वेन बोधस्सविवाद इति कथनात् पूर्वोक्तं गौरवं गुरुतरभारोद्वहनमिव शरीरस्य चित्तस्य वा न खेदजनकम् इति वाच्यम् ? एतल्लेखस्यारम्भिककार्य्यकारणभावगौरवागाञ्जागरूकत्त्वात् । नच रथो गच्छतीत्यादौ कृतिशक्तिवादे कथमाश्रये लक्षणा विभक्तौ न लक्षणा, अत्र "कर्त्तृकर्मणोः‿कृती"ति सूत्रं ज्ञापकमन्यथा शेषषष्ठ्यैव कर्तृत्त्वकर्मत्त्वयोर्लक्षणया लाभे सिद्धे तत्किमर्थम् । किञ्च ऋजवस्सन्तु पन्था इति वैदिकवाक्ये सुप्रत्ययस्यैकवचनस्य बहुत्त्वे लक्षणयैव सिद्धौ "सुपां सुलुक्पूर्वसवर्णाच्छेये"तिसूत्रङ्किमर्थन्तथा च कथं रथाश्रये लक्षणा । नच "द्वन्द्वे च "न बहुव्रीहा"वित्यादौ प्रथमार्थकसप्तमी लक्षणाम्विना कथं सिद्ध्येदिति वाच्यम् ? सूत्राणां छन्दोवत्त्वेन निर्वाहादिति वाच्यम् ? सुब्विभक्तौ न लक्षणेति सिद्धान्तस्यैवाऽभिमतत्त्वात् । ननु ज्ञापकमसति बाधके प्रमाणानां सामान्ये पक्षपात इतिन्यायेन विभक्तौ न लक्षणा, तिङोऽपि "सुप्तिङन्तमि"ति सूत्रेण विभक्तित्त्वमिति सामान्यकल्पनेति चेत्तर्हि विवादग्रस्तोऽयम्विषयः । नच कृतौ शक्तिस्वीकारे करोति करणं कृतिरित्यादौ कृधातोरपि स एवार्थः प्रत्ययार्थोऽपि कृतिरेव कथन्तयोः‿कृत्योरन्वय इति वाच्यम् ? द्वौ ब्राह्मणौ व्यतिलुनीत इतिवदर्थबोधकपदद्वयसमभिव्याहारे एकस्मिन्सङ्कोच्यसङ्कोचकभावाश्रयणेन अगत्या युक्त्यन्तराऽभावेन चाक्षतेः । न च कृतिशक्तिवादे रथो गच्छतीत्यादौ लक्षणा कृतिर्य्यत्नविशेषस्तस्य रथेऽसम्भव इति कथञ्चैतद् गौरवन्दोषावहम् । अत एव निषादस्थपतिं याजयेदिति मीमांसावाक्ये निषादश्चासौ स्थपतिश्चेति कर्मधारयो न तु निषादानां स्थपतिरिति तत्पुरुष‿ पूर्वपदे लक्षणाप्रसङ्गाव । अत एव च राजपुरोहितौ स्वाराज्यकामौ यजेयातामित्यत्रोभयपदार्थप्रधानोराजा च पुरोहितश्चेति द्वन्द्व एव न तु राज्ञ‿पुरोहिताविति तत्पुरुषो लक्षणाप्रसङ्गात् । अत एव च उद्भिदा यजेत पशुकाम इत्यत्रोद्भिच्छब्द‿कर्मनामधेयम् नान्यत उद्भिनत्तीति उद्भिद् खनित्रादिकन्तद् गृहीत्वा उद्भिद्वता यागेनेत्यर्थाश्रयणे तु मत्वर्थलक्षणापत्तिरित्युद्भिदधिकरणं सङ्गच्छते । तथा च कर्त्तर्य्येव शक्तिरिति वाच्यम् ? यत्र गौरवलाघवचर्चा नास्ति तत्र तत्र वाक्यार्थबोधोपपत्तये लक्षणा सफलैव तद्वदिहाऽपि स्वीकारे न क्षतिः । किञ्च प्रसिद्धाऽप्रसिद्धशक्तिभ्यामेव लक्ष्यलक्षणस्थले

TUTE OF ADVAN
Acc. No.

निर्वाहे वैयाकरणमते लक्षणावृत्तेरनङ्गीकारात । गंगायां घोष इतिवद्दयो गच्छतीत्यादौ अप्रसिद्धाया एव शक्तेस्स्वीकारेण लक्षणया गौरवानुसन्धानं वैयाकरणमतेऽपि नास्तीति प्रतिद्वन्द्योवोत्तरमिति गौरवाऽभावात्कृतावेव शक्तिरिति विचित्रस्तरङ्ग इति शुक्लाः । नच कर्तरि शक्तिः व्यापाराश्रयत्वं कर्तृत्वम् तत्र व्यापारस्य धातुलभ्यत्वेनाश्रयमात्रं लकारार्थ इति वैयाकरणमतेऽखण्डमाश्रयत्वं शक्यतावच्छेदकन्नैयायमते यत्नत्वमिव साम्यं यथा आश्रयत्वं तथा यत्नत्वम् यत्नत्वाश्रयत्वयोस्समानरूपत्वेन कथन्वैयाकरणमते गौरवं यत्नत्वशक्यतावच्छेदकत्वस्येवाश्रयत्वशक्यतावच्छेदके वैषम्याऽभावात् । कुमारीभार्य्य इत्यादौ "जातेश्चे"तिपुम्बद्भावनिषेधोपपत्तये कौमारादीनां क्षणिकपदार्थानामपि जातित्वम् जातिलक्षणे नित्यत्वप्रवेशो नानास्तीति तत्त्वम् । एवञ्च क्वाऽपि शाब्दबोधविरोधो न । किञ्च दीधितिकृता सिद्धान्तलक्षणे आश्रयत्वाधिकरणत्वादयोऽतिरिक्ता एव पदार्था अन्यथा आश्रयत्वस्य अधिकरणस्वरूपत्वे आधेयस्वरूपत्वे वा परस्पराऽसंयुक्तघटभूतलसत्त्वेऽपि इदानीम्भूतलं घटवदिति प्रतीतेर्दुर्वारत्वात् । तथा च कथङ्कृतिशक्तिवाद इति वाच्यम् ? तत्तत्कालपुरुषाद्युपाधिभेदेन तत्कालीनतत्पुरुषीयज्ञानाधिकरणसाक्षात्संयोगसम्बन्धावच्छिन्नविषताया आश्रयणेनाऽसंयुक्ते भूतलं घटवदिति प्रयोगानापत्तेः । अन्यथा कालान्तरे पुरुषान्तरे च संयोगादिसत्त्वेऽनिष्टरूपापत्तेदुर्वारत्वात् । जातिलक्षणे नित्यत्वखण्डनप्रकारश्च विकल्पग्रस्तः, कुमारीभार्य्यः कुमारभार्य इत्युदाहरणद्वयदानात् इति पक्षद्वयं समर्थितन्तत एव द्रष्टव्यम् । तथा च तत्तदाश्रयभेदादाश्रयत्वम्भिन्नम्भिन्नमिति वैयाकरणमते शक्यतावच्छेदकमिथा कृतावेव शक्तिरिति । किञ्च पूर्वोक्तयोगेनाधिकरणतावान्पर्वतस्समवायेनेत्यापत्तेरपरिहार्य्यत्वाच्चेति शुक्लाः ।

केचित्तु—"लः कर्मणी"तिसूत्रे ल इतिपदं षष्ठ्यन्तं "लः परस्मैपदमि"तिवत् लस्य य आदेशस्स कर्मणीति सूत्रार्थ इति तन्न ? जसन्तत्वे श्रुतपदार्थेन सम्बन्धः षष्ठ्यन्तत्वे आदेशपदाध्याहार इति गौरवात्प्रथमान्तत्वमेवेति ।

यद्यपि आश्रयत्वस्य नित्यत्वे जलवान्घट इत्त्यादौ घटादेरुत्पत्तिविनाशव्यवहारो न भवेदयम्बजदोषस्तथापि वायुरूपयोस्समवायैकत्वेऽपि रूपनिरूपितत्वाऽभावेन वायौ रूपवत्ताप्रतीत्यभाववन्न प्रतिभाति हानिस्तथाऽपि पूर्वोक्तापत्तेरनिवार्य्यत्वात् ।

वस्तुतस्तु—लकारस्य कर्त्तरि शक्तौ वैयाकरणमते राजसम्बन्धिपुरुषाऽभिन्न-

कर्तृकं गनममिति तात्पर्येण राज्ञ~पुरुषो गच्छतीति प्रयोगवत् स्वस्वामिभावादि· सम्बन्धेन राज्ञ~कर्त्रन्वयविवक्षया राजा पुरुषो गच्छतीति प्रयोगापत्तिः। नच तत्र षष्ठी भवति, तदर्थस्य प्रातिपदिकार्थविशेष्यत्वे सत्येव विवक्षिते षष्ठीविधानादत्र तस्या अप्राप्तेः। तथा चैतद्दोषभिया कृतावेव शक्ति~प्रतिभाति।

ननु "भावकर्मणो"रितिसूत्रेण तयोरात्मनेपदविधानम् "शेषात्कर्त्तरि परस्मैपद· मि"मितिसूत्रेण कर्त्तरि परस्मैपदविधानमिति लकाराणां भावकर्मकर्त्तारोऽर्थास्स्युरेव "ल~कर्मणोति सर्वं सूत्रङ्किमर्थमिति प्रश्नः। निरुक्तरीत्या सूत्राभावे नियन्तुरभावेन सकर्मकेभ्योऽपि धातुभ्यो भावे प्रत्ययापत्तौ पटं भिद्यते यज्ञदत्तेनेत्यादिप्रयोगापत्तेः। न चैवम् "अकर्मकेभ्यो भावे ल" इत्येव सूत्रमस्तु भावे चेल्लकारस्तर्हि अकर्मकेभ्य एवेति न्यायेन कदाचित् "अकर्मकेभ्यश्चेद् भाव एव" इति नियमापत्त्या अकर्मकेभ्यः कर्त्तरीष्टस्यापि लकारस्याभावापत्तेः। नच एवम् "भावे चाकर्मकेभ्यो ल" इत्येव लाघवात् सूत्रमस्तु चकारात् कर्त्तरीत्यनुकर्षात् अकर्मकेभ्यो भावे कर्त्तरि च लकारोप· पत्तौ न दोष इति वाच्यम्? कर्त्तरीत्यंशेऽपि भाववत् अकर्मकेभ्य एवेति नियमा· पत्तौ सकर्मकेभ्यः कर्त्तरि इष्टस्यापि लकारस्याभावापत्तेः। नन्वेवमेतद्दोषवारणाय "लश्च भावे चाकर्मकेभ्यः" इति न्यास एवास्तु पूर्वत्र योगे चकारात् कर्त्तरीत्यनुकृ· ष्य लकाराः सकर्मकेभ्यः कर्त्तरि स्युरितितात्पर्य्यवर्णनेन कर्मणि च ज्ञापकादेव ल· कारविधाने सिद्धे न दोष इति चेन्न? उत्तरत्र "तयोरेव कृत्यक्त" इतिसूत्रे कर्म· णोऽपि परामर्शार्थमेतस्यावश्यकत्वादिति।

आख्यातस्थले क्रियामुख्यविशेष्यकश्शाब्दबोधः। अत एव "भावप्रधानमा· ख्यातं सत्वप्रधानानि नामानीति" यास्काचार्य्यवचनमनुकूलम्। भावो भावना· उत्पादना क्रियेति यावत्। अत एव चैत्रो ग्रामङ्गच्छतीत्यादावेकत्वावच्छिन्नचैत्रा· ऽभिन्नकर्तृको वर्त्तमानकालिको ग्रामाभिन्नकर्मनिष्ठो यत्संयोगस्तदनुकूलगमनव्या· पार इत्येवमनेकशाब्दबोधप्रकारा अस्मत्कृतपरिष्कारदर्पणे द्रष्टव्या इति वैयाकरण· मतम्। काण्डे कुड्ये रमते ब्रह्मणकुलमिति क्रियाप्रधानमिति "ह्रस्वो नपुंसके प्रा· तिपदिकस्ये"तिसूत्रभाष्यं सङ्गच्छते। तत्रैतन्नाम क्रियानुरोधेन गुणभूतक्रियावाचि· भ्य~कालान्तरे प्रत्यया न तु तिङ् कालान्तरे इति व्यवतिष्ठते। प्रथमान्तार्थमु· ख्यविशेष्यकशाब्दबोधो नैयायिकमते। नच प्रथमान्तार्थविशेष्यत्वे क्रियाया विशे· षणत्वे पाको भवति इत्यर्थं पचति भवति इति शिष्टवाक्यन्नोपपन्नं स्यात् अत एव

"भूवादि" सूत्रभाष्ये का तर्हि सम्बन्धो युक्तिः पचति त्वम्पचसि भवति पक्ष्यति भवतीति प्रश्ने समुत्तरम्, पचादयः क्रिया भवतिक्रियायाः कर्त्र्यो भवन्तीति। किञ्च "कर्मणा यमभिप्रैती"ति सूत्रभाष्ये क्रियाऽपि कृत्रिमङ्कर्म क्रियाऽपि हि क्रियया ईप्सिता भवति कया क्रियया सन्दर्शनादिक्रिययेति। नच आख्यातपदेन आख्यायते सर्वप्रधानीभूतोऽर्थोऽनेनेत्याख्यातपदेन धातुरेवेति वाच्यम् ? आख्यातमाख्यातेन क्रियासातत्य इति "मयूरव्यंसकादि"सूत्रे तस्याऽग्रहणात्। भाष्ये चत्वारि पदजातानि नामाख्यातोपसर्गनिपाताश्च भावकालकारकसंख्याश्चत्वारोऽर्थाः आख्यातस्य। तत्र भावः प्रधानमिति तद्भाष्यम्, निष्कौशाम्बिरिति विषये "सुप्आख्यातेषु चे"ति समर्थसूत्रस्थवार्त्तिके कृति आख्यातपदयोग उपचारात् इति भाष्यम् कृत्प्रकृतिभूतधातावव्याप्तेश्च शिश्ये इतितिङन्तेऽतिव्याप्तेश्च।

किञ्च आख्यातपदेन धातोर्ग्रहणे क्रियावाचकत्वमात्रे वक्तव्ये प्रधानपदनिवेशनिरर्थकत्वापत्तेश्च। अत एव "प्रशंसायां रूपबि"ति सूत्रभाष्ये पचति रूपम पचतो रूपमित्यादेरसिद्धिमाशङ्क्य क्रियाप्रधानमाख्यातम् द्रव्यप्रधानन्नाम यतः क्रियाम्पृष्टस्तिङाचष्टे किन्देवदत्तः करोति पचतीति द्रव्यम्पृष्टः कृता आचष्टे कतरो देवदत्तः यः पाचक इत्युक्तम्। नच नामान्याख्यातजानीति केषाञ्चिदुक्तिः कथं सिद्ध्येदिति वाच्यम् ? तत्राख्यातपदेन तदवयवो धातुर्गृह्यते प्रमाणञ्च सर्वन्नामधातुजमेवेति निरुक्तमुणादयो बहुलमिति सूत्रभाष्योक्तेः।

प्रकृतिः प्रत्ययो विभक्तिरित्येतावन्नाम सत्ता द्रव्यं लिङ्गं संख्या चेति नामार्थः। तेषु द्रव्यम्प्रधानमिति निरुक्तभाष्योक्तेश्च।

किञ्च नमन्ति आख्यातार्थम्प्रति विशेषणीभवन्ति इति नामेति च निरुक्तभाष्यम्। अव्ययातिरिक्तनामलक्षणम् उपसर्गनिपाता इत्यत्र निपातपदमव्ययमात्रोपलक्षणमिति तद्भावः। तथा च क्रियाप्रधानमाख्यातमित्यत्र प्रत्ययार्थाऽपेक्षया यत्र धात्वर्थः प्रधानन्तदाख्यातमित्यर्थः। नच धात्वर्थापेक्षया क्रिया कृतिः प्रधानमिति तदर्थः भावशब्देनापि कृतिरेवेति वाच्यम् ? प्रत्ययार्थं प्रधानमित्येव सिद्धे भूयत इत्यादिभावाऽख्यातेऽव्याप्तेश्च। नच क्रियाप्रधानमाख्यातमित्यत्र क्रियायाः प्रधानं क्रियाप्रधानमर्थात्क्रियानिरूपितप्रधानम्प्रथमान्तार्थ इति नैयायिकसरणिस्समायातीति वाच्यम् ? नमन्त्याख्यातार्थम्प्रति विशेषणीभवन्तीति तद्भाष्यविरोधात्। नच पचति त्वम्पचसि भवतीत्यत्र भवतीति सम्बोधनपदम् काञ्चिन्नायिका-

न्प्रति कस्यचिदुक्तिः तामनुवदति भाष्यकार इति न क्रियाकर्तृत्वेन तार्किकहानि-रिति वाच्यम् ? उत्तरस्थले पचादय ᳵ क्रिया भवतिक्रियाया इति दर्शनेन सम्बोधन-विवरणाऽभावात् । नच तत्राऽपि भवतीति सम्बोधनमेव परिच्छेद्यम् कत्वर्थो भव-न्तीत्यस्य क्रियाद्वयसमभिव्याहारे एकस्या विशेषणत्वमपरस्या विशेष्यत्वं यथा ग-च्छति भुंक्ते तत्रेति कथनेन गमनम्बिना भोजनन्न भवतीति तत्तदधीनत्वमिति यावत् । शाब्दबोधे विशेषणत्वम्विशेष्यत्वमन्वयव्यतिरेकगम्यमिति चेद्वाच्यम् ? पूर्वोक्तानेकभाष्य उपायाऽभावात् । नच भावप्रत्यये देवदत्तेन भूयत इत्यादौ प्रथ-मान्तपदाऽभावात्तदर्थस्य विशेष्यत्वाऽभावेऽपि प्रथमान्तपदसमभिव्याहारे समवाय-सम्बन्धावच्छिन्नैकत्वत्वावच्छिन्नैकत्वविशिष्टकर्तृविशिष्टक्रियाऽश्रयो देवदत्त इति प्र-थमान्तार्थविशेष्यकबोध एव स्यादिति वाच्यम् ? तादृशबोधस्यानुभवाऽगम्यत्वात् । किञ्च यत्रोभे भावप्रधाने भवत इत्युत्तरनिरुक्तविरोधात्तदर्थश्च तद्भाष्ये नामाख्यात-यो ᳵ परस्परविनाभूतयोस्स्वस्वपदार्थोक्तापेक्षस्य भावप्राधान्यमेकस्य सत्वप्राधा-न्यम् । अथ पुनर्यत्र ते उभे भवतो वाक्ये तत्र भावप्रधाने आख्यातार्थप्रधाने वाक्ये ह्याख्यातम्प्रधानन्तदर्थत्वाद् गुणभूतन्नाम कृदभिहितो भावो द्रव्यवत्प्रकाशते ।

तदर्थस्य भावनिष्पत्तावङ्गत्वात् एवन्तद्वाक्ये आख्यातम्प्रधानमपि । अत्र नामपदेन निपातातिरिक्तस्य ग्रहणन्तेन क्रियाया नञर्थविशेषणत्वेऽपि न क्षतिः । अत एव हरिर्वसन्दर्शत्यादौ "धातुसम्बन्धे प्रत्यया" इत्यनेन प्रधानतिङन्तवाच्यक्रि-यानुरोधेन गुणभूतक्रियावाचिभ्य ᳵ कालान्तरे प्रत्ययाः न तु तिङ् कालान्तरे इति व्यवतिष्ठते "वर्त्तमानसामीप्य" इत्यादिना कालबाध एव प्रकान्त ᳵ काल एव बाध्यते कृदुपस्थाप्यस्य गौणत्वानापत्तौ कालबाधानुपपत्तेर्दोषकरत्वात् । किञ्च सुवृष्टिश्चेदभविष्यत्तदा सुभिक्षमभविष्यदित्यादौ क्रिययो ᳵ प्रधानाऽप्रधानभावेन कार्यकारणभावेनान्वयाऽभावे हेतुहेतुमत्त्वाऽप्रतीतेर्हेतुहेतुमतोर्लिङित्यादेरप्रवृत्त्यापत्तौ रूपहानिरितोऽपि क्रियाप्राधान्यमध्यवसीयते नतु प्रथमान्तार्थप्राधान्यम् । किञ्च नैयायिकमते प्रथमान्तार्थप्राधान्यस्वीकारे "पुरीमवस्कन्द लुनीहि नन्दनम्मुषाण" त्यादौ पुर्य्यवस्कन्दनरूपाऽस्वातन्त्र्यक्रियेत्याकारकाद्यन्वयाऽभावे धातुसम्बन्धे विहि-तस्य लोडादेरनापत्तिः । नच तिङन्तोपस्थापिता क्रिया क्रियान्तरैस्समवायन्न ग-च्छतीति भाष्यविरोधः इति वाच्यम् ? क्रिययो ᳵ कर्त्तृकर्मभावेन परस्परमन्वयो भवति न तु करणत्वेनेति कैयटेन व्याख्यातत्वात् । अत एव पठन् गच्छतीतिवत्पठति

गच्छतीति कुतो नेति तद्वाक्यस्याऽप्रामाणिकत्वम् कैयटोक्तेः। अत एव "सुबन्तं हि यथाऽनेकसुबन्तस्य विशेषणम्। तथा तिङन्तमप्याहुस्तिङन्तस्य विशेषणम्"। किञ्च प्रथमान्तार्थप्राधान्ये न्यायाभिमते प्रचारणीये पश्य मृगो धावति शृणु देवदत्तो गायति इत्यादौ प्रधानदर्शनक्रियाम्प्रति मृगस्य कर्मत्वात्तन्निरूपितद्वितीयापत्तिः। मृगकर्तृकोत्कटधावनाऽभिन्नमृगकर्मकदर्शनस्यैव तन्मते प्रतीतेः। वैयाकरणमते तु समवायसम्बन्धावच्छिन्नैकत्वत्वावच्छिन्नैकत्वविशिष्टमृगाऽभिन्नाश्रयकमृगकर्तृकोत्कटधावनकर्मकन्दर्शनमिति उत्कटधावनस्य क्रियात्वेन द्वितीयानवकाश इति वाच्यम्? तत्र विशिष्टमहावाक्यार्थबोधे वाक्यार्थस्य कर्मत्वाद्वाक्यस्य प्रातिपदिकत्वाभावेन द्वितीयानवकाशात्। अत एव क्रमादमुन्नारद इत्यबोधि स इत्यादौ वाक्यार्थस्य कर्मत्वान्न द्वितीयेति। नच निपातेनेतिनाऽभिहितत्वान्न द्वितीयात्रेति वाच्यम्? अभिधानञ्च प्रायेण तिङ्कृत्तद्धितसमासैरित्येव भाष्ये पाठात्। अमुन्दृश्यमानन्तेजः पुञ्जमित्यबोधि नारदोऽयम् नारद इति अमुन्तेजः पुञ्जमबोधीति कथनेनाऽविरोधात्। नच उत्कटधावनानुकूलव्यापाराश्रयो मृगस्तं पश्येत्यर्थापत्तौ मृगस्यैव कर्मतासम्बन्धेन न्यायानुयायिमते प्रधानत्वेन च प्रातिपदिकत्वेन द्वितीयापत्तिः अन्यथा पचन्तञ्चैत्रम्पश्येत्यादावपि पाकानुकूलकृतिविशिष्टस्य चैत्रस्य कर्मतया द्वितीयानापत्तेरिति वाच्यम्?

शक्तिग्रहम्व्याकरणोपमानकोशाप्तवाक्याद् व्यवहारतश्च। वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतस्सिद्धपदस्य वृद्धाः॥

लोकेऽर्थबोधनाय वाक्यप्रयोगः, येन तात्पर्येण यद्वाक्यम्प्रयोज्यन्तदेवार्थमेयति।

उपक्रमोपसंहारावभ्यासोऽपूर्वताफलम्। अर्थवादोपपत्ती च षड्भिस्तात्पर्यनिर्णयः।

उत्कटधावनदर्शनतात्पर्येणैव वाक्यप्रयोगः। शृणु देवदत्तो गायतीत्यस्य गानकर्मकश्रवणतात्पर्येण प्रयोगः, विचित्रन्धावनम् विचित्रङ्गानमिति धावनम्पश्य गानं शृणु इति तात्पर्यवर्णनेन तत्र कर्मत्वाऽप्रवृत्तेः।

नच पश्य लक्ष्मणपम्पायां वकः परमधार्मिकः। शनैश्शनैः पदन्धत्ते मीनादेर्नाशशङ्कया॥

इत्यादौ प्रथमान्तबकस्यैव दर्शनक्रियायामन्वयस्तस्य प्रातिपदिकत्वेऽपि न

द्वितीया, तत्रैव पश्य मृगो धावतीत्यादावपि न द्वितीयेति वाच्यम् ? वक्तोऽस्ति तपश्येति अध्याहृतक्रियया तत्र द्वितीयाया अप्रवृत्तेः । अत एव धिग्देवदत्तेत्यादौ सम्बोधनविषये अस्त्यादिक्रियाध्याहारेण सम्बोधनं क्रियाया विशेषणम् ।

सम्बोधनपदं यच्च तत्क्रियायाश्विशेषणम् । व्रजानि देवदत्तेति निघातोऽत्र तथा सति ॥

अध्याहृतक्रियाया विशेष्यत्वेन तत्रैव देवदत्तपदार्थस्यान्वयेन द्वितीयाया अप्रवृत्तेः । एवमेव

श्रुत्वा ममैतन्माहात्म्यन्तथा चोत्पत्तयश्शुभाः ।

इत्यत्रार्षत्वान्न द्वितीयेति समाधानमवकाय अस्त्याद्यध्याहारेणैव द्वितीयाया अप्रवृत्तिवर्णनात् । नच प्रथमान्तार्थस्य विशेष्यत्वाभावे नयायिकविरुद्धे

सुरथो नाम राजाभूत्समस्ते क्षितिमण्डले । तस्य पालयतस्सम्यक् प्रजाः पुत्रानिवौरसान् ॥

इत्यत्र

तुल्येऽपराधे स्वर्भानुर्भानुमन्तश्चिरेण यत् । हिमांशुमाशु ग्रसते तन्म्रदिम्नः स्फुटम्फलम् ॥

इत्यत्र च तच्छब्देन सुरथग्रसनपरामर्शोऽनुपपत्तिरिति वाच्यम् ? "दाणश्च सा चेच्चतुर्थ्यर्थे" इतिसूत्रे सापदेन "समस्तृतीयायुक्तादि"तिसूत्रोपात्ताप्रधानतृतीयापरामर्शेन सर्वनाम्नान्न प्रधानपरामर्शकत्वमपि तु बुद्धिस्थमात्रपरामर्शकत्वम्प्रधानाऽप्रधाननियमो नास्ति । तथा च सुरथग्रसनपरामर्शे बाधाऽभावेन क्रियामुख्यविशेष्यकबोधे हान्यभावात । नच पश्य मृगो धावतीत्यत्र धावनपदार्थस्य दर्शनक्रियायां सकर्मिकायाम्वैयाकरणमते कथमन्वय इति वाच्यम् ? शाब्दबोधे चैकपदार्थेऽपरपदार्थस्येतिनियमेन कर्मत्वस्य संसर्गतया भानात् । नच मृगपदार्थस्य प्रथमान्तार्थस्य संसर्गमर्यादया कर्मत्वमाश्रित्यान्वयस्स्यादिति वाच्यम् ? निपातातिरिक्तप्रातिपदिकार्थयोः क्रियानिपातातिरिक्तप्रातिपदिकार्थयोश्च साक्षात भेदसम्बन्धेनाऽन्वयोऽव्युत्पन्न इति सिद्धान्तेन विभक्त्यर्थाऽभावादन्वयानर्हत्वात । अप्रथमासामानाधिकरण्येन तिङो बाधित्वा शत्राद्यापत्तेश्च । नच वाऽसरूपोऽस्त्रियामित्यनेन तिङेति वाच्यम् ? लादेशेषु तदभावस्य भाष्ये स्पष्टत्वात । यो धावति मृगस्तम्पश्येत्यध्याहारेणान्वयेऽपि भाष्यसम्मतस्य पदैकवाक्यतयान्वयस्य विलयापत्तेश्च । नीलविशिष्टघटस्य दर्शनकर्मत्वे प्रतिपिपादयिषिते नीलं घटञ्जानामीत्यादौ द्वितीयानापत्तेश्च ।

नच तत्राऽपि मृगीयधावनस्य विशिष्टस्य दर्शनकर्मत्वे विशेषणस्य मृगस्याऽपि कर्मत्वात्प्रातिपदिकत्वाच्च द्वितीयापत्तिरिति वाच्यम् ? धावनक्रियाविशेषणस्य मृगस्यान्तरङ्गसंस्कारप्रथमाविभक्तिविशिष्टस्य पश्चाद् बहिरङ्गसंस्कारकर्मत्वानर्हत्वात् । नैयायिकमते तु धावनक्रियानिरूपितविशेष्यत्वेन मृगस्य दृशौ साक्षाद्विशेषणत्वात् । अन्तरङ्गादपि प्रधानकार्यं सर्वतो बलवदिति "हेतुमति च" तिसूत्रभाष्यसम्मतत्वेन बलवत्वाद् द्वितीया दुर्वारैव । किञ्च चैत्रःपचतीत्यादौ कृतिप्रकारकप्रथमान्तार्थविशेष्यको बोध इति चेन्न ? एकविशेषणवैशिष्ट्येन उपस्थिते विशेष्ये तत्सजातीयसम्बन्धेन विशेषणान्तरसम्बन्धस्याऽव्युत्पन्नत्वात्। अस्मादेव नियमात् राजपुरुषो भार्य्यायाश्चेति न प्रयोगः, घटो द्रव्यत्वस्येति च न प्रयोग इति समर्थसूत्रे भाष्ये स्पष्टम् । किञ्च नैयायिकमते पचति यजतीत्यादीनां साधुत्वापत्तिः स्वस्वमतव्युत्पत्त्यनुसारेण बोधस्य दुर्वारत्वेऽपि साधुत्वस्य निर्विवादत्वात्। साधुत्वञ्च वैयाकरणमत एव भेद्यभेदकसम्बन्धोपाधिभेदनिबन्धनम् साधुत्वन्तद्भावेऽपि बोधोऽनेन निवार्य्यते इति हरिः। "ते विभक्त्यन्ताःपदमिति" गौतमसूत्रे न्यायवार्त्तिककारोऽप्याह द्वयी विभक्तिस्स्वाद्यन्तन्नाम तिबाद्यन्तमाख्यातमित्यादि दूषणम् ।

किञ्च प्रथमान्तार्थप्राधान्ये भावप्रत्ययस्थले प्रथमान्तपदाऽभावात्क्रियाविशेष्यक एव बोधस्तथा सर्वत्रैवास्तु व्यवहारः। नच वैयाकरणमते कर्मप्रत्ययस्थले पच्यते तण्डुल इत्यादौ देवदत्तकर्तृकपाकानुकूलविक्लित्त्याश्रयस्तण्डुल इत्यादिबोधे प्रथमान्तार्थस्य प्राधान्यन्तस्मात्सर्वत्रैव स व्यवहार इति वाच्यम् ? पूर्वोक्तानेकदोषाणान्दुर्वारत्वात् मीमांसकजैमिनिसूत्रविरोधाच्च । तथाहि "भावार्थाःकर्मशब्दास्तेभ्यःक्रिया प्रतीयेतैष ह्यर्थो विधीयते" इतिसूत्राऽकारः, कर्मशब्दा यजेत दद्यात् जुहुयादित्यादयस्ते भावार्थाः प्रधान्येन क्रियार्थाः । क्रियाप्रधानमाख्यातम् भावप्रधानमाख्यातमित्यभियुक्तोक्तेः । अतस्तेभ्यःक्रिया प्राधान्येन प्रतीयेत हि प्रधान्यादेवैषोऽर्थःक्रियारूपःसर्वत्र विधीयते नतु नामार्थः तस्याश्च शीघ्रनाशित्वाद् द्वारमपूर्वस्वीकार्यमिति तदर्थः । तस्माच्च भावना प्रत्ययार्थ इत्यपि सिद्ध्यति । भावप्रधानमाख्यातमित्यपि वचन क्रियाविशेष्यकबोधसञ्चालकञ्च सिद्ध्यतीति । नच प्रत्ययार्थःप्रधानम् प्रकृतिप्रत्ययौ सहार्थम्ब्रूतस्तयोःप्रत्ययार्थःप्रधानमिति नियमोऽत एव पक्ता पाचक इत्यादीनां सिद्धिरौपगव इत्यादीनाञ्च । तथा च प्रत्ययार्थस्य कर्तुःप्रकृत्यर्थत्वात् प्रथमान्तार्थविशेष्यकबोध आपततत्येव इति

नैयायिकमतम्भावनाप्रत्ययार्थवादिमीमांसकमतञ्च सुदृढमेवेति वाच्यम् ? प्रत्ययार्थप्रधानमिति वचनं यत्र प्रत्ययस्य वाचकता तद्विषयकमेव, कर्त्तरि शबित्यादौ तद्विषयाद्धातोरित्यर्थेन तिङान्तद्द्योतकत्वाद्विशेषणत्वमेव भावे इत्यस्य तथाऽन्वयस्यैव युक्तत्वात् । अत एव "स्नुक्रमोरनात्मन" इतिसूत्रभाष्ये "भावकर्मणोरि"ति सूत्रस्य भावकर्मवृत्ताद्धातोरित्यर्थकथनं कृतम् तस्य भाष्यस्य भावकर्मविषयाद्धातोरित्यर्थं कैयट आह धातोस्तद्विषयत्वम् कर्मादिविशिष्टक्रियावाचकत्वेन कर्मादीनां स्वप्रकृतिकप्रत्ययवाच्यत्वेन च बोध्यन्तत्र च तिङ्विषयलकारस्थले आद्यम्, क्रियाप्रधानमाख्यातमिति स्मृत्यन्तरात् शबादिप्रत्ययविषये त्वन्त्यम् । सत्त्वप्रधानानि नामानीति स्मृतेः शबादिविकरणा द्योतका एव, सार्वधातुके यगितिसूत्रस्यसार्वधातुकार्थाकर्त्रादिय इति भाष्यन्तु तद्द्योतया इत्यर्थकमिति न विरोधः । पदसाधुत्वार्थकाः पञ्चकम्प्रातिपदिकार्थ इति सिद्धान्तमूलकमेव सत्वप्रधानानि नामानीति । स्त्रीप्रत्ययान्तस्य तु न नामत्वम् शास्त्रप्रक्रियायान्ततोऽप्यर्थबोधात् तत्र प्रत्ययार्थत्वपक्षे द्विवचनाद्यनुपपत्तिराशङ्किता भाष्ये । अत एव भगवान्पाणिनिराह—"प्रधानप्रत्ययार्थवचनमर्थस्याऽन्यप्रमाणत्वादि"तिसूत्रम् । प्रधानम्प्रत्ययार्थ इति न कार्य्यम् अर्थस्य अर्थावबोधकत्वात् अन्यप्रमाणत्वात् व्युत्पत्त्यनुसारित्वादिति हि तदर्थः, न तु व्यभिचरितत्वादित्यर्थः । अत एव लोकत एव सिद्धेरिति कौमुदी । तथा च क्रियामुख्यविशेष्यक एव बोध इति निश्चितम् । किञ्च यद्वाच्या क्रिया क्वचित् क्रियान्तरानाकाङ्क्षा स्वयमेव प्रधानन्तदाख्यातमिति भाष्यञ्च प्रमाणम् । किञ्च प्रत्ययार्थकालकारकसंख्यापेक्षया धात्वर्थप्राधान्यमदूष्यवत्यमिति च महाभाष्यम् । किञ्च पञ्चमे न्यायभाष्येऽपि क्रियाकालयोगाऽभिधायि आख्यातधात्वर्थमात्रञ्च कालाऽभिधानविशिष्टमिति तत्र कालेनाभिधानेन कारकेण विशिष्टन्धात्वर्थमात्रमाख्यातार्थ इति तदर्थः तस्यैव व्याख्यानं क्रियाप्रधानमाख्यातमिति वार्त्तिककृताऽत्र कृतम् । किञ्च तत्रैव सूत्रे वार्त्तिककार आह विशेषणविशेष्यभावस्यैकविषयत्वाद् यदि गोशब्दस्य तिष्ठतिशब्दस्य चैकमभिधेयम्भवति ततो विशेषणविशेष्यभावाऽपत्रयोर्गोशब्दतिष्ठतिशब्दयोस्सामानाधिकरण्यं युज्यते नान्यथा । एवञ्चानेन प्रमाणेन विस्पष्टं कारकस्य विशेषणत्वम् प्रत्ययार्थत्वम् क्रियाया मुख्यविशेष्यकत्वञ्चेति । किञ्च न्यायटीकस्वात्स्यायन आह पदसमयपरिपालनाय व्याकरणम्प्रवृत्तमिति व्याकरणबोध्योऽर्थ ऐश्वरसमयविषय इत्येवम् ।

पाणिनीयम्महाशास्त्रम्पदसाधुत्वलक्षणम् ।
सर्वोपकारकं ग्राह्यं कृत्स्नन्त्याज्यन्न किञ्चन ॥

इतिपराशरः "ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्चेति" श्रुतिः साधुत्वज्ञानविषया सैषा व्याकरणस्मृतिरित्यभियुक्तवाक्यञ्च । शक्तिग्रहम्व्याकरणोपमानमिति च । रोदितीव पठतीति वाक्यन्तु न भवति, नहि तिङन्तेनोपमानमस्ति इति किन्तु तत्र सम्भावनार्थं इवशब्द इति कैयटः तिङन्तेन शब्देनोपमानबोधो नास्तीति तद्भाष्यार्थः । उपमेयत्वन्त्वस्त्येव ब्राह्मणवदधीत इति प्रतीतेः । पचति भवतीति व्याख्या—क्रियायाः कर्तृकर्मभावेनान्वयेऽपि तदितरकारकत्वेन क्रियान्तरेऽन्वयो न भवति । क्रियानाधारकारकत्वेनान्वयाद्वा लिङ्गसंख्याऽनन्वयाद्वा असत्त्वभूतत्वम्बोध्यम् । नच भूवादिसूत्रभाष्योक्तपचति भवतीत्यादौ समानवाक्ये तिङ्द्वयलाभेन तद्व्यावृत्त्यर्थं "न्तिङ्ङतिङः" इतिसूत्रेऽतिङ्ग्रहणस्याऽवश्यकत्वेन तत्प्रत्याख्यानपरभाष्यविरोध इति वाच्यम् ? लौकिकैकवाक्यत्वसत्वेऽपि एकतिङ्वाक्यमिति परिभाषितस्याऽसत्त्वमितिभाष्याशयात् । लौकिकैकवाक्यत्वञ्च "सुप्तिङन्तचयो वाक्यं क्रिया वा कारकान्विते"त्यमरोक्तमेव ।

क्वचिद् भावे लकारेऽपि बहुत्वसंख्याप्रतीत्या बहुवचनम् "हतशायिकाश्शय्यन्ते" इति यादृशानि हतानां शयनानि तादृशानि शयनानीत्यर्थः । तथा च क्रियाप्रधानता युक्ततरैव ।

काले युक्ताऽभिसरणे मुह्यन्ति मृगमोहिकाः ।
उष्ट्रासिकास्समास्यन्ते शय्यन्ते हतशायिकाः ॥

इतिभाष्यकारप्रयोगः ।

## ( अथ धात्वर्थविचारः )

फलव्यापारयोर्धातुराश्रये तु तिङस्स्मृताः ।
फले प्रधानम्व्यापारस्तिङर्थस्तु विशेषणम् ॥ १ ॥

फलव्यापारोभयवाचकत्वन्धातुत्वमित्याशयः । फलव्यापारोभयवाचकत्वं सकर्मकत्वम् केवलव्यापारमात्रवाचकत्वमकर्मकत्वम् । ननु व्यापार एव धात्वर्थोऽस्तु घटः कर्मत्वम् आनयनम् कृतिरिति वाक्याच्छाब्दबोधवारणाय घटङ्करोतीतिवत् घटं यतते इति प्रयोगवारणाय च घटनिष्ठकर्मतानिरूपकमानयनमित्याकारकशाब्दबुद्धित्वावच्छिन्नम्प्रति द्वितीयान्तघटपदसमभिव्याहृताऽऽनयेतितिङन्तपदसमभि-

व्याहारः कारणम् । फलावच्छिन्नव्यापारविषयकशाब्दबुद्धित्वावच्छिन्नम्प्रति द्वितीयान्तग्रामादिपदसमभिव्याहृततिङन्तगच्छत्यादिपदसमभिव्याहारः कारणम् । अत एव पाको गमनमित्यनयोर्गम्धात्वर्थस्य पाके पचधात्वर्थस्य गमने न व्यभिचारः । तत्तदर्थबोधे तत्तद्धातुसमभिव्याहारः कारणम्, फलविशेषविषयकशाब्दबुद्धित्वावच्छिन्नम्प्रति धातुविशेषजन्यव्यापारोपस्थितिः कारणम् । ग्रामन्त्यजतीत्यत्र ग्रामकर्मकत्यागरूपफलविषयकशाब्दबुद्धित्वावच्छिन्नम्प्रति त्यजधातुजन्यस्पन्दनरूपव्यापारोपस्थितिः कारणम् । ग्रामकर्मकसंयोगरूपफलविषयकशाब्दबोधम्प्रति गमधातुजन्यस्पन्दरूपव्यापारोपस्थितिः कारणम् । अत एव ग्रामंगच्छतीतिवत् ग्रामं स्पन्दते इति न प्रयोगः । न च फलव्यधिकरणव्यापारवाचकत्वं सकर्मकत्वम् फलसमानाधिकरणव्यापारवाचकत्वमकर्मकत्वमिति सकर्मकाऽकर्मकव्यवस्थाऽनुपपत्तिरिति फलावच्छिन्नव्यापारे धातोश्शक्तिरिति वाच्यम् ? तत्तद्वाक्यार्थविषयकशाब्दबोधे चिकीर्षिते द्वितीयान्तपदजन्यार्थविशिष्टव्यापारवाचकत्वं सकर्मकत्वम् केवलव्यापारमात्रवाचकत्वमकर्मकत्वमिति लक्षणात् । अत एव कर्मसंज्ञकार्थान्वय्यर्थकत्वं सकर्मकत्वम् तदनन्वय्यर्थकत्वमकर्मकत्वमत एव "अधिशीङ्स्थासाङ्कर्म"-त्यनेन कर्मत्वादकर्मकत्वेऽपि अध्यास्यते भूमिरिति वाक्ये कर्मणि प्रत्ययः ।

यत्तु—यद्धातुसमभिव्याहृतफलव्यापारोभयप्रतीतिविषयत्वं सकर्मकत्वन्तद्भिन्नत्वमकर्मकत्वमिति तन्न? कर्मप्रयोगे सकर्मकत्वज्ञानं सकर्मकत्वज्ञाने कर्मप्रयोग इत्यन्योन्याश्रयापत्तेः । नच पूर्वकल्पे फलविषयकबोधे द्वितीयाजन्योपस्थितिर्हेतुः व्यापारविषयकशाब्दबोधे धातुजन्योपस्थितिर्हेतुरिति अकर्मकधातुसमभिव्याहारे व्यापारविषयकशाब्दबोधम्प्रति धातुजन्यव्यापारोपस्थितिर्हेतुरिति कार्य्यकारणभावद्वयम् । फलव्यापारोभयार्थकधातौ तु धातुजन्यफलव्यापारोभयोपस्थितिर्हेतुरिति एक एव कार्य्यकारणभाव इति लाघवमिति वाच्यम् ? सम्भवति लघौ धर्मे गुरौ नावच्छेदकत्वमिति सिद्धान्तेन फलावच्छिन्नव्यापारत्वस्य शक्यतावच्छेदकत्वे गौरवात् विनिगमनावैकल्येन फलप्रकारतानिरूपितव्यापारविशेष्यताशालित्वेन व्यापारविशेष्यतानिरूपितफलप्रकारताशालित्वेन हेतुत्वस्वीकारे कार्य्यकारणभावद्वयगौरवाच्च । नच तद्वत्ताबुद्धिम्प्रति तदभाववत्तानिश्चयस्य तदभावव्याप्यवत्तानिश्चयस्य च प्रतिबन्धकत्वम्, विभिन्नविषयकप्रत्यक्षत्वावच्छिन्नम्प्रति शाब्दसामग्र्याः प्रतिबन्धकत्वमिति नियमः । समानविषयकानुमितित्वावच्छिन्नम्प्र-

पाणिनीयम्महाशास्त्रम्पदसाधुत्वलक्षणम् ।
सर्वोपकारकं ग्राह्यं कृत्स्नन्त्याज्यन्न किञ्चन ॥

इतिपराशरः "ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्चेति" श्रुतिः साधुत्वज्ञानविषया सैषा व्याकरणस्मृतिरित्यभियुक्तवाक्यञ्च । शक्तिग्रहम्व्याकरणोपमानमिति च । रोदितीव पठतीति वाक्यन्तु न भवति, नत्रै तिङन्तेनोपमानमस्ति इति किन्तु तत्र सम्भावनार्थे इवशब्द इति कैयटः तिङन्तेन शब्देनोपमानबोधो नास्तीति तद्भाष्यार्थः । उपमेयत्वन्त्वस्त्यव ब्राह्मणवदधीत इति प्रतीतेः । पचति भवतीति व्याख्या—क्रियायाः कर्तृकर्मभावेनान्वयेऽपि तदितरकारकत्वेन क्रियान्तरेऽन्वयो न भवति । क्रियानाधारकारकत्वेनान्वयाद्वा लिङ्गसंख्याऽनन्वयाद्वा असत्त्वभूतत्वम्बोध्यम् । नच भूवादिसूत्रभाष्योक्तपचति भवतीत्यादौ समानवाक्ये तिङ्द्वयलाभेन तद्व्यावृत्त्यर्थं "तिङ्ङतिङः" इतिसूत्रेऽतिङ्ग्रहणस्याऽवश्यकत्वेन तत्प्रत्याख्यानपरभाष्यविरोध इति वाच्यम् ? लौकिकैकवाक्यत्वसत्वेऽपि एकतिङ्वाक्यमिति परिभाषितस्याऽसत्त्वमितिभाष्याशयात् । लौकिकैकवाक्यत्वञ्च "सुप्तिङन्तचयो वाक्यं क्रिया वा कारकान्विते"त्यमरोक्तमेव ।

क्वचिद् भावे लकारेऽपि बहुत्वसंख्याप्रतीत्या बहुवचनम् "हतशायिकाश्शय्यन्ते" इति यादृशानि हतानां शयनानि तादृशानि शयनानीत्यर्थः । तथा च क्रियाप्रधानता युक्ततरैव ।

काले युक्ताऽभिसरणे मुह्यन्ति मृगमोहिकाः ।
उष्ट्रासिकास्समास्यन्ते शय्यन्ते हतशायिकाः ॥

इतिभाष्यकारप्रयोगः ।

## ( अथ धात्वर्थविचारः )

फलव्यापारयोर्धातुराश्रये तु तिङस्स्मृताः ।
फले प्रधानम्व्यापारस्तिङर्थस्तु विशेषणम् ॥ १ ॥

फलव्यापारोभयवाचकत्वन्धातुत्वमित्याशयः । फलव्यापारोभयवाचकत्वं सकर्मकत्वम् केवलव्यापारमात्रवाचकत्वमकर्मकत्वम् । ननु व्यापार एव धात्वर्थोऽस्तु घटः कर्मत्वम् आनयनम् कृतिरिति वाक्याच्छाब्दबोधवारणाय घटङ्करोतीतिवत् घटं यतते इति प्रयोगवारणाय च घटनिष्ठकर्मतानिरूपकमानयनमित्याकारकशाब्दबुद्धित्वावच्छिन्नम्प्रति द्वितीयान्तघटपदसमभिव्याहृताऽऽनयेतितिङन्तपदसमभि-

व्याहारः कारणम् । फलावच्छिन्नव्यापारविषयकशाब्दबुद्धित्वावच्छिन्नम्प्रति द्वितीयान्तग्रामादिपदसमभिव्याहृततिङन्तगच्छत्यादिपदसमभिव्याहारः कारणम् । अत एव पाको गमनमित्यनयोर्गम्धात्वर्थस्य पाके पचधात्वर्थस्य गमने न व्यभिचारः । तत्तदर्थबोधे तत्तद्धातुसमभिव्याहारः कारणम्, फलविशेषविषयकशाब्दबुद्धित्वावच्छिन्नम्प्रति धातुविशेषजन्यव्यापारोपस्थितिः कारणम् । ग्रामन्त्यजतीत्यत्र ग्रामकर्मकत्यागरूपफलविषयकशाब्दबुद्धित्वावच्छिन्नम्प्रति त्यजधातुजन्यस्यन्दनरूपव्यापारोपस्थितिः कारणम् । ग्रामकर्मकसंयोगरूपफलविषयकशाब्दबोधम्प्रति गमधातुजन्यस्पन्दरूपव्यापारोपस्थितिः कारणम् । अत एव ग्रामंगच्छतीतिवत ग्रामं स्पन्दते इति न प्रयोगः । न च फलव्यधिकरणव्यापारवाचकत्वं सकर्मकत्वम् फलसमानाधिकरणव्यापारवाचकत्वमकर्मकत्वमिति सकर्मकाऽकर्मकव्यवस्थाऽनुपपत्तिरिति फलावच्छिन्नव्यापारे धातोश्शक्तिरिति वाच्यम् ? तत्तद्वाक्यार्थविषयकशाब्दबोधे चिकीर्षिते द्वितीयान्तपदजन्यार्थविशिष्टव्यापारवाचकत्वं सकर्मकत्वम् केवलव्यापारमात्रवाचकत्वमकर्मकत्वमिति लक्षणात । अत एव कर्मसंज्ञकार्थान्वय्यर्थकत्वं सकर्मकत्वम् तदनन्वय्यर्थकत्वमकर्मकत्वमत एव "अधिशीङ्स्थासाङ्कर्म"-त्यनेन कर्मत्वादकर्मकत्वेऽपि अद्ध्यास्यते भूमिरिति वाक्ये कर्मणि प्रत्ययः ।

यत्तु—यद्धातुसमभिव्याहृतफलव्यापारोभयप्रतीतिविषयत्वं सकर्मकत्वन्तद्भिन्नत्वमकर्मकत्वमिति तन्न? कर्मप्रयोगे सकर्मकत्वज्ञानं सकर्मकत्वज्ञाने कर्मप्रयोग इत्यन्योन्याश्रयापत्तेः । नच पूर्वकल्पे फलविषयकबोधे द्वितीयाजन्योपस्थितिर्हेतुः व्यापारविषयकशाब्दबोधे धातुजन्योपस्थितिर्हेतुरिति अकर्मकधातुसमभिव्याहारे व्यापारविषयकशाब्दबोधम्प्रति धातुजन्यव्यापारोपस्थितिर्हेतुरिति कार्य्यकारणभावद्वयम् । फलव्यापारोभयार्थकधातौ तु धातुजन्यफलव्यापारोभयोपस्थितिर्हेतुरिति एक एव कार्य्यकारणभाव इति लाघवमिति वाच्यम् ? सम्भवति लघौ धर्मे गुरौ नावच्छेदकत्वमिति सिद्धान्तेन फलावच्छिन्नव्यापारत्वस्य शक्यतावच्छेदकत्वे गौरवात् विनिगमनावैकल्येन फलप्रकारतानिरूपितव्यापारविशेष्यताशालित्वेन व्यापारविशेष्यतानिरूपितफलप्रकारताशालित्वेन हेतुत्वस्वीकारे कार्य्यकारणभावद्वयगौरवाच्च । नच तद्वत्ताबुद्धिम्प्रति तदभाववत्तानिश्चयस्य तदभावव्याप्यवत्तानिश्चयस्य च प्रतिबन्धकत्वम्, विभिन्नविषयकप्रत्यक्षत्वावच्छिन्नम्प्रति शाब्दसामग्र्याः प्रतिबन्धकत्वमिति नियमः । समानविषयकानुमितित्वावच्छिन्नम्प्र-

ति शाब्दसामग्रया प्रतिबन्धकत्वमिति च नियमः । तथा च प्रतिबध्यप्रतिबन्धकभावेऽपि विनिगमनाविरहेण प्रतिबध्यतानिरूपितप्रतिबन्धकता प्रतिबन्धकतानिरूपितप्रतिबध्यतेति पूर्वम्प्रतिबध्यो धर्त्तव्य प्रतिबन्धको वा इति । तथा च द्वितीयाजन्यधातुजन्येतिकार्य्यकारणभावेऽनेकाऽनेककार्य्यकारणभावापत्तिः । फलावच्छिन्नव्यापारधात्वर्थं तु एक एव प्रतिबध्य प्रतिबन्धको वा एवम्पूर्वोक्तनियमद्वयेऽपि एक एव । तथा च न केवलव्यापारमात्रन्धात्वर्थ किन्तु वैयाकरणाऽभिमतफलव्यापारयोर्द्धातुरित्येवेति वाच्यम् ।

ग्राममध्यास्ते ग्राममधिशेते ग्रामं संयुनक्तीत्यादौ द्वितीयाया आधेयत्वार्थकत्वेन केवलफलमात्रार्थकत्वेनाभीष्टाऽसिद्ध्यासर्वमते गौरवप्रवर्त्तकस्य द्वितीयार्थस्य नान्तरीयकत्वात् । लाघवगौरवानुसन्धानपरित्यागेऽपि व्यापारमात्रस्य धात्वर्थत्वे पच्यते तन्डुलस्स्वयमेवेत्यादौ कर्मवद्भावानापत्तिः । नच धात्वर्थव्यापारजन्यफलाश्रयत्वमेव कर्मवद्भावविषय इति वाच्यम् ! यत्यते घटस्स्वयमेवेत्यस्याऽऽपत्तेः, धात्वर्थजन्ययत्नजन्योत्पत्तिरूपफलस्य घटे सत्त्वात । अथवा क्रियते घटस्स्वयमेवेत्यस्याऽनापत्तेः ।

यावत्सिद्धमसिद्धम्वा साध्यत्त्वेनाऽभिधीयते ।
आश्रितक्रमरूपत्वात्सा क्रियेत्यभिधीयते ॥
असत्त्वभूतो भावश्च तिङ्पदैरभिधीयते ।

व्यापाराणामग्नीन्धनसंयोगत्वतण्डुलप्रक्षालनत्वचुल्ह्युपरिधारणत्वतण्डुलस्थालीजलसंयोगत्वानामानन्त्येऽपि बुद्धिविशेषविषयत्वोपलक्षितवक्तृजिज्ञासितधर्मावच्छिन्ने शक्तेन तदादिन्यायेन बुद्धिविशेषत्वमेव शक्यतावच्छेदकमिति न तत्तन्नामोच्चारणेन गौरवम् । किंच फलस्य द्वितीयार्थत्वे ग्रामङ्गच्छतीत्यादौ संयोगादिरूपफलस्य द्वितीयार्थत्वे तस्य जनकत्वसम्बन्धेन धात्वर्थव्यापारेऽन्वयः । ग्रामवृत्तिसंयोगजनकव्यापारवानिति बोध एवम्प्रकारेण भूमिंगच्छति न महीरुहमित्यादौ महीरुहवृत्तिसंयोगस्य जनकत्वसम्बन्धेन गमनव्यापाराऽभावो वक्तव्य इत्यत्र जनकत्वसम्बन्धावच्छिन्नप्रतियोगिताको महीरुहवृत्तिसंयोगस्याऽभावो नञर्थो वक्तव्यस्सच जनकत्वसम्बन्धावच्छिन्नप्रतियोगिताकोऽभावोऽप्रसिद्ध एव, वृत्त्यनियामकस्य जनकत्वसम्बन्धस्याऽभावप्रतियोगितावच्छेदकत्वाऽभावात् वृत्तिनियामकस्यैव सम्बन्धस्याऽभावप्रतियोगितावच्छेदकत्वात् अप्रसिद्धस्य च बोधो न सम्भवतीति । किंच

द्रव्यङ्गच्छति न गुणमित्यादौ दोषः गुणमिति द्वितीयार्थस्संयोगरूप एव फलम् प्राप्त इति जनकत्वसम्बन्धावच्छिन्नप्रतियोगिताको यो गुणवृत्तिसंयोगस्याऽभावस्तद्द्रव्यापारवांश्चैत्र इत्येव शाब्दबोधो वक्तव्यस्सच न सम्भवति गुणे संयोगरूपगुणस्य बाधात् । गुणवृत्तिसंयोगरूपफलाऽभावस्य नञर्थत्वाऽसम्भवेनान्वयबोधाऽसम्भवात्। किंच द्रव्यङ्गच्छति नाभावमित्यादौ च दोषः समवायसम्बन्धावच्छिन्नाऽऽधेयतैव द्वितीयार्थः, यथा ग्रामङ्गच्छतीत्यत्र संयोगस्य समवायेन ग्रामवृत्तित्वात्तादृशसंयोगे ग्रामनिरूपिताऽऽधेयताऽप्यस्ति ग्रामानुयोगिकसमवायोऽप्यस्त्येवेति संयोगरूपफलनिष्ठाऽऽधेयता सम्बन्धावच्छिन्नाऽस्तीति, यदि समवायातिरिक्तकालिकादिसम्बन्धावच्छिन्नाऽप्याधेयता द्वितीयार्थस्स्यात्तदा ग्रामन्त्यजत्यपि चैत्रे ग्रामत्यागकाले समवायेन चैत्रसंयोगस्य ग्रामाऽवृत्तित्वेऽपि कालिकसम्बन्धेन ग्रामे सम्भवादेव तादृशकालिकसम्बन्धावच्छिन्नग्रामवृत्तिसंयोगमादाय ग्रामङ्गच्छति चत्र इति प्रयोगापत्तिरूपोऽतिप्रसङ्गस्स्यादेव । तन्निवारणार्थं समवायसम्बन्धावच्छिन्नाऽऽधेयता द्वितीयार्थ इति वक्तव्यम् । तथा च ग्रामत्यागकाले समवायेन चैत्रसंयोगस्य ग्रामेऽसम्भवात् कालिकसम्बन्धावच्छिन्नग्रामवृत्तिसंयोगवृत्त्याऽऽधेयतयाऽकालिकसम्बन्धावच्छिन्नत्वेन समवायसम्बन्धावच्छिन्नत्वाऽभावात । समवायानवच्छिन्नाऽऽधेयताया द्वितीयार्थत्वाऽभावाच्च ग्रामं गच्छतीति प्रयोगाऽपत्तिर्नास्त्येव । एवं स्थिते द्रव्यं गच्छति नाभावमित्यत्राप्यभावपदोत्तरद्वितीयार्थस्समवायसम्बन्धावच्छिन्नाऽऽधेयतेति वक्तव्यम्, तत्र यदि कोऽपि पदार्थोऽभावे समवायसम्बन्धेन स्यात्तदा तस्मिन्नभावानुयोगिकसमवायस्य सत्वेन तन्निष्ठा साऽभावनिरूपिताऽऽधेयता समवायसम्बन्धावच्छिन्ना स्यादिति नचैवमस्ति अभावे कस्याऽपि समवायेन वृत्तित्वाऽभावादिति, अभावनिरूपितस्य तथाविधाऽऽधेयत्वस्य समवायसम्बन्धावच्छिन्नाऽऽधेयत्वस्याऽप्रसिद्ध्या तदभावबोधाऽसम्भवात्। अभावनिरूपितस्य समवायावच्छिन्नाऽऽधेयत्वस्य नञाऽभावबोधाऽसम्भवः । अप्रसिद्धप्रतियोगिकाऽभावस्याऽस्वीकारात् ।

वस्तुतस्तु—फलावच्छिन्नो व्यापारो धात्वर्थः । व्युत्पत्तिवैचित्र्येण नामार्थधात्वर्थयोरपि साक्षादन्वयबोधलाघवाऽभावस्तु न, द्वितीयाशक्तिधातुशक्तिकल्पनापेक्षया धातुजन्यविशिष्टविषयोपस्थितिरेव गरीयसी ।

भावनापरपर्य्यायव्यापारो न प्रत्ययार्थ उक्तयुक्तेः "भावार्थाःकर्मशब्दास्ते-

भ्यऽक्रिया प्रतीयेतैष ह्यर्थो विधीयते" इति मीमांसकसूत्रबलेन ।

फलव्यापारयोर्धातुराश्रये तु तिङः स्मृताः ।

इति शाब्दिकप्रकार एव ज्यायान् ।

वृत्त्यनियामकेति—आश्रयत्वसंयोगादीनामेव वृत्तिनियामकत्वम् तेषामेव प्रतियोगितावच्छेदकत्वम् । येन सम्बन्धेन यऽपदार्थो यत्र वर्त्तते तेनैव सम्बन्धेन तत्रैव तत्पदार्थस्याऽभावोऽपि नञा प्रत्याय्यते । स्वत्वसम्बन्धेन तु न कस्यचित्पदार्थस्य राजादेऽपुरुषादौ स्थितिऽप्रतीयते । न हि राज्ञऽपुरुष इत्युक्ते स्वत्वसम्बन्धेन राज्ञऽपुरुषे स्थितिऽप्रतीयते येन स्वत्वस्य वृत्तिनियामकत्वं स्यात् । वृत्तिनियामकत्वाऽभावेन च स्वत्वस्य प्रतियोगितावच्छेदकत्वाऽभाव इति व्याख्यानेनाऽधिकरणतानियामकसम्बन्धस्य प्रतियोगितावच्छेदकत्वम्नास्तीति सर्वत्रानुगमः कार्य इति ।

जौनपुर बदलापुर उदयपुरगोलहवाभिजन—कौमुदीकल्पलतिकापरिष्कारदर्पणव्यु-
त्पत्तिवादशास्त्रार्थकलापरिभाषेन्दुशास्त्रार्थकलावैयाकरणभूषणसारशास्त्रार्थ-
कलाप्रयोगशास्त्रार्थकलाद्विविंशत्यधिकग्रन्थप्रणेत्रा घटिकाशतकश-
तावधानसंस्कृताशुकविवैयाकरणशिरोमण्याद्यनेकपदवीक-
"मामखोर" गर्गवंशावतंसेन प्रसिद्धशास्त्रार्थदिग्गजेन
कविचक्रवर्त्तिना पण्डितराजशुक्लश्रीवेणी-
माधवशास्त्रिणा विरचिता लऽकर्म-
शास्त्रार्थकला समाप्ता ।

शिवमस्तु

# वाक्यपदीय

## न्याय-व्याकरणाचार्य

## पं० श्रीसूर्यनारायणशुक्लजी कृत

## भावप्रदीपव्याख्या, टिप्पणी सहित ।

व्याकरणाचार्य परीक्षा में प्रविष्ट वाक्यपदीय का ब्रह्मकाण्ड कितना कठिन है यह बात प्रत्येक शास्त्रानुरागि को विदित ही है। इस ग्रन्थ का महत्त्व कैयट तथा नागेशभट्ट प्रभृति महाभाष्य के समान आदर करते हैं। अन्य दर्शनों के पण्डित भी इसका बहुत ही आदर करते हैं। वैयाकरणों का स्फोटवाद इसी ग्रन्थ के ऊपर अवलम्ब रखता है। इस ग्रन्थ की प्राचीन हेलाराजकी एक टीका मिलती है जोकि अत्यन्त कठिन होनेके कारण छात्रों को समझ में नहीं आती। इस लिए मैंने काशी गवर्नमेन्ट संस्कृत कालेज के अध्यापक न्याय—व्याकरणाचार्य पण्डित श्रीसूर्यनारायणशुक्लजी से प्रार्थना कर इसकी परीक्षोपयोगी सरल तथा विस्तृत भावप्रदीप टीका तथा टिप्पणी बनवाकर आप लोगों के सेवामें समर्पित करते हैं इस टीका में टीकाकार ने न्यायतात्पर्यटीका प्रशस्तपादभाष्य श्लोकवार्तिक शाङ्करभाष्य प्रभृति ग्रन्थों की तथा कैयट विवरण की सहायता लेकर वैयाकरण सिद्धान्त को ठीक समझाने की चेष्टा की है। टीका के विस्तृत होने पर भी श्लोकार्थ को स्फुट करने के लिए टीकाकार ने पहिले टीका में श्लोक का अर्थ लिख कर विशेष वक्तव्य अयंभावः इत्यादि लेखों से लिखा है। नागेश तथा हरिका जहां स्फोट के जन्यत्वाजन्यत्व वाक् के चातुर्विध्यत्रैविध्य में मतभेद है उसे स्फूट दिखाया गया है। मुझे दृढ विश्वास है कि आप पुस्तक को देखते ही प्रसन्न होगें।

मूल्य बहुत सस्ता केवल १) विद्यार्थियों को कमीशनकाट कर ।।।=) में मिलेगा ॥

---

१ फक्किकारत्नमञ्जूषा। सिद्धान्तकौमुदीस्थपङ्क्तिव्याख्यानरुपा।
प्रथमभाग २) द्वितीयभाग २) सम्पूर्णका रु० ४)

२ फक्किकाप्रकाश। टिप्पणी सहित। फक्किका ग्रन्थो में अत्यन्त उपयोगी।
मूल्य १।)

## पण्डितराजश्रीवेणीमाधवशुक्लशास्त्रिणा रचिताः

### तदात्मजेन

## श्रीराजनारायणशास्त्रिणा सम्पादिता ग्रन्थाः।

१. कौमुदीकल्पलतिका। (सिद्धान्तकौमुदीगुप्तरहस्यप्रकाशः) १॥)

२. परिष्कारदर्पणः। परिभाषेन्दुशेखरखण्डनात्मकलघुशास्त्रार्थकलासहितः। १=)

३. व्युत्पत्तिवादः। शास्त्रार्थकलाटीकासहितः। २)

४. परिभाषेन्दुशेखरः। बृहच्छास्त्रार्थकलाटीकासहितः। (यन्त्रस्थः)

५. प्रयोगशास्त्रार्थकला। प्रदीपटिप्पणीसहिता। =)

६. सादृश्यशास्त्रार्थकला तथा लक्ष्मकर्मशास्त्रार्थकला। प्रदीपटिप्पणी सहिता। =)

७. कूटशास्त्रार्थकला तथा लौकिकन्यायशास्त्रार्थकला। प्रदीपटिप्पणीसहिता। ।=)

८. मनोरमाशब्दरत्नप्रश्नोत्तरावली। (अव्ययीभावान्ता) स्वर-वैदिकप्रकरणसिद्धान्तकौमुदी, वैयाकरणभूषणसार, परिभाषेन्दुशेखर, व्याकरणमहाभाष्याणां राजकीय-परीक्षासु समागतैः २० वर्षप्रश्नैश्च संयोजिता ॥=)

९. " " प्रथमखण्डः।-) द्वितीयतृतीयखण्डौ ।=)

१०. तर्कसंग्रहः। मूललक्षणटिप्पणीसहितः। -)

११. न्यासकल्पलता। अद्भुतोऽयं न्यासग्रन्थः। ॥)

प्राप्तिस्थानम्—

जयकृष्णदास-हरिदास गुप्तः—

चौखम्बा संस्कृत सीरिज़ आफिस,

विद्याविलास प्रेस, बनारस सिटी।